न भूयोपि च तत्प्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा ॥ २५ ॥ अज्ञानसंज्ञौ भवबंधमोक्षौ द्वौ नाम नाऽ
न्यौ स्त ऋतज्ञभावात् ॥ अजस्रचित्यात्मनि केवले परे विचार्यमाणे तरणाविवाहनी ॥ २६ ॥ ॥ ॥

न्यत उपपाद्यते ॥ ननु ज्ञानेन कथं भवं तरंतीति तस्याज्ञानमूलत्वादित्याह आत्मानमेवेति तेनैव ज्ञानेनैव प्रपं
चितं प्रपंचः ॥ रज्ज्वामहेर्भोगभवाविति सर्पशरीरस्याध्यासापवादौ यथेति ॥ २५ ॥ ननु ज्ञानेन सत्तंरंत्येव किमिद
मुच्यते तरंतीवेति तत्राह ॥ अज्ञानसंज्ञाविति अज्ञानेन संज्ञा ययोस्तौ भवबंधमोक्षौ भवेन बंधस्तन्मोक्षस्तु तौ द्वौ
नाम प्रसिद्धौ ऋतज्ञभावात् ॥ ऋतज्ञात्सत्तस्य यो भावः ॥ तस्माद्न्यौ न स्तः ॥ ननु कथमेवं महाननपलापः ॥ क्रियते एव
मार्यविचारादित्याह अजस्रेति अखंडानुभवरूपे परे शुद्धे आत्मनि अज्ञानेन बंधः अत एव ज्ञानेन मोक्ष इति

भवा५

५१

नर

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु परमार्थतस्तानात्मज्ञानेन कुतो बंधो निवर्तते ॥ आत्मात्मनैवात्मज्ञानादिति को ऽयमाग्रहस्त्वयाशंक्या ॥
ह ॥ परस्थासाराद्वात्मनः परस्वरूपास्फूर्तिः तदपवादेन तवैवात्मस्वरूपे ज्ञाने युक्तमितीममर्थं विस्मयेनाक्रो
शन्निवाह तावामिति ॥ तामात्मानं परं देहादिमतात्मनि देहादौ मध्यस्यतत्यापरं देहादिभ्यात्मानं
मतादेहादावात्मानमध्यस्य ॥ अत्र तत्र आत्मा बहिर्मृग्य इति विचेंनहि गृहे नष्टवस्तु वने मृग्यत इ
त्यर्थः ॥ विवेकिनस्तु प्रत्यक्त्वरूपत एव परमात्मानं विचिन्वंतीत्याह अत्रामेव इति भवतीति भ
वः ॥ विज्ञानात्मकशरीरांतमध्यस्थं तमात्मानं मृगयंतिअत [illegible] तत्पज्ञेत ॥ अपवदंतः ननु सतोज्ञानेना ।

तामात्मानं परमतापरमात्मानमेव च ॥ आत्मा पुनर्बहिर्मृग्य अहो ज्ञजनताज्ञता ॥ २ ॥ अंत
र्भवंतं तं भवंतमेव हृत्यानतनो मृगयंति संतः ॥ असंतमध्यान्यहि संतेरेणासंतं गुणातें किं
मुंचंति संतः ॥ २८ ॥ अथापि तेदेव पदांबुजद्वय प्रसादलेशानुगृहीत एवहि ॥ जानाति तत्व

भगवन्महिम्नो न चान्य एकोपि चिरं विचिन्वन् ॥ २९ ॥

नं किं मम तोपवादेनेत्याशंक्याह ॥ अध्यस्तापवादे विनाधिष्ठानतत्वेन ज्ञायत इति सतां व्यवहारेणा
ह ॥ असंतमिति ॥ अतिसमीपे असंतमध्याहि संतेरेणातन्निषेधे विनेत्यर्थः ॥ संतेगुणारज्जुः संतः किं मुंचंति
जानंतीति अतिसंतमपि गुणा इति वा न जानंतीत्यर्थः तस्मादात्मतयैव ज्ञानान्मुक्तिरिति भावः ॥ २८
नन्वेवं ज्ञानेकसाध्ये मोक्षे किमिति भक्तिरुद्भाविता ॥ अत आह ॥ अथापीति यद्यपि हस्तप्राप्यमिव
ज्ञानमुक्तं तथापि हे देव तव पादांबुजद्वयमध्ये एकदेशस्यापि यः प्रसादलेशः पितेनानुगृहीत
एव भगवतः तेव महिम्नः ॥ तत्त्वं न जानाति हे भगवान्स्तवमहिम्नः तत्त्वमिति वा एकोपि किंचिदपि

विविक्तविविक्तविदावहाद्रूपाद ॥ २ ॥

श्री भा० द० टी० ८२

ततस्तस्मात्स भूरिभागः महाभाग्यं अत्र भवे ब्रह्मजन्मनि तिरश्चामपि मध्ये येन जन्मना अस्मिन्वा अन्येन भावेन भवदीयानां
जनानां एकोऽपि यः कश्चिदपि भूत्वा निषेवे अत्र अर्थं सेवे ॥२९॥ यद्देवादिजन्मनोऽपि यत्र कृष्णविरहः किमु जन्मैव ।
पृच्छसि यो नाम कोऽन तत्प्रभिः ॥ स्त्रीकेवलाभिनंदति ॥ अहोऽतिधन्याः इत्यादिभिः व्रजगोरमण्यः ॥ व्रजस्थागावोऽपि नो

तदस्तु मे नाथ स भूरिभागो भवेऽत्र वान्यत्र तु वा तिरश्चां ॥ येनाहमेकोऽपि भवज्जनानां भूत्वा निषे-
वे तव पादपल्लवं ॥२९॥ अहोऽतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमतीव ते मुदा ॥ यासां विभो
वत्सतरात्मजात्मना यत्तृप्तयेऽद्यापि न चालमध्वराः ॥३०॥ अहो भाग्यमहो भाग्यं नंदगोपव्र-
जौकसां ॥ यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम् ॥ ३१ ॥ ॥

स्त्रातिधन्या यासां ते त्वया वत्सतरात्मजात्मना वत्सानामात्मनां च रूपेण यस्य तव तृप्तये सर्वेऽपि य-
ज्ञास्तु यद्यपि न शक्ताः ते न त्वया प्रतिस्तनं तन्नित्यपर्यंतं यासां स्तन्यममृतं त्वं पीतमिति ॥३०॥ नद्भग-
वत्सखानां महिमा वक्तुं ज्ञातुं च न शक्यते इत्याह अहोऽतिपुनरुक्त्या भाग्यस्य सर्वोपरि विशिष्टत्वमु-
क्तं किं च ॥३१॥

८२

कस्त्र

वं

एतेषां गोपानां गोपीनां च भाग्यमहिमा तावदास्तां वक्तुं शक्नोति ॥ शर्वादयः ॥ शर्वोऽहंकाराधिष्ठाता
श्रादिर्येषां चंद्रादीनां एकादशानां तेन तथा वयं च वयमित्यात्मानमेवाह बहुमन्यमानो ब्रह्मा ॥ एवंमनो
बुद्ध्यहंकारचक्षुराद्यधिष्ठातारः त्रयोदश देवा एतावत् बत ब्रह्माहो भूरिभागाः ॥ यस्मादेतेषां हृषी
काणि इंद्रियाण्येव चषकाणि पानपात्राणि तैः तेन वचनेन देशस्य चित्ताधिष्ठानश्चंद्रश्चीपवडदजेसरोनेत

पानर

एषां तु भाग्यमहिमाच्युत तावदास्तामेकादशैव हि वयं बत भूरिभागाः ॥ एतद्धृषीकचषकैर
सकृत्पिबामः शर्वादयोऽङ्घ्र्युदजमध्वमृतासवं ते ॥ ३३ ॥

योर्मधु मकरंदः तदेवामृतं स्वादुत्वात् आसवं मादकं पिबामः ॥ एतदुक्तं भवति यदा ब्रह्मन्नेकमिंद्रिया
भिमानिनो वयं कीर्तिसौहार्दसौगंध्याद्येकैकदेशमेव विनोपि कृतार्था एतदासवेंद्रियैः सर्वसेवि
नामेतेषां व्रजवासिनां किं वर्ण्यते भाग्यमिति ॥ ३३ ॥

व१ ॥

श्री
भाद
टी॰
६२

अतोमयाप्रार्थितंतन्नदत्तुमेनाथसभूरिभागइतियत्तदेवाह ॥ तद्भूरिभाग्यमितिकिंतदिहमनुष्यलो
केयत्किमपिजन्मतत्राप्यटव्यांयत्रतत्रापिगोकुलेयत ॥ अहोसत्यलोकंविहायात्रजन्मनिजाते।
कोलाभस्तत्राहअपिकतमाङ्घ्रिरजोऽभिषेकमिति ॥ गोकुलवासिनांमध्येपिकतमस्ययस्यक

तद्भूरिभाग्यमिहजन्मकिमप्यटव्यांयद्गोकुलेपिकतमांघ्रिरजोभिषेकं ॥ यज्जीवितंतु
निखिलंभगवान्मुकुंदस्त्वद्यापियत्परजः श्रुतिमृग्यमेव ॥ ३३ ॥
द

स्यांघ्रिरजसाअभिषेकोयस्मिंस्तत्तुगोकुलवासिनएवकृतोधन्याः ॥ तत्राहयदितितेषांजी
वितंनिखिलंमुकुंदइतिमुकुंदःपरमेवजीवितमित्यर्थः दुर्लभतामाहअद्यापीति ॥ श्रुतिमृग्यं
वेदैरपिमृग्यतएवनतुदृश्यतेइत्यर्थः अहोतेषांभाग्यंयेनतस्यतत्पदंपश्यंति ॥ ३३ ॥ ६२

वंधिता ५

प्रापिता ४

स्रीयवकिंवरपिनेछ्नार्यनामिति ॥ नेषांयेषांभक्ताभवानपिक्ष्रणीवास्ते ॥ ननुकिंरान्नेनसमर्थोहियेनक्ष्ली
स्पाम्पनप्राहइनापिभवान ॥ अपिपषांकृत्वापिकिंविषफलान्सर्वात्मकानुहेतोःपरफलेप्रातारास्पतीति ॥ नस्त्रेनः
प्रपतनसर्वेभृगकुलविचारयन्मनुस्यति ॥ ननुमामवदन्नाग्रन्ताः स्यामितिचेत् ॥ नहिनहिमदेषात्स्वमतो
भक्तानांयेवैषः ॥ नदनुकारमासाएपापिर्दृष्टनापिवामेवापितानहिएतन्नेबोधवानामपिदास्यामीतिचेन्न
ग्राहमकुलेतिवकावास्सरसहिनेति ॥ एषामपिनाक्वेवदेयपामामित्याहयदिति ॥ येषांधर्मादयः नन्कृतेन

एषांत्वाषनिवामिनांवनभवान्त्विंदेवरातेनिनस्त्रुतोविषफलान्फलेन्नटपरेकृत्राप्यपन्मुत्यति ॥ मदेषा
दिवहतननापिसकुलावामेवदेवापिनायइर्मार्थमहन्तियान्मतनयप्रागाणयास्कन्कृते ॥ २४ ॥ तावद्म
गादयलेननाः तावत्कारागृहंगृहं ॥ तावन्मोहांद्विनिगडोयावत्कुसननेनेनाः ॥ २५ ॥ अपवेनिग्रपंचो
पिविट्टंवयमिभूतले ॥ अपबजननानंदसंदोहःश्रयितेप्रभो ॥ २६ ॥

रर्थमेवेत्यर्थः ॥ २४ ॥ ननुविगतरागादिदोषाणांसंन्यासिनामपिनमनः परंकिंचिदस्तिकथमेषामपर्योभ्रमन
प्राहतावदितिरेकुमरागादयः तावत्स्तेनाः चौराभवंतितयातावत्गृहमपिकारागृहंवंधनागारमोहमपित
वदेवांद्विनिगडः यादृष्टंवलायावन्नेतदीयाजननानांभवंतितदीयानांतुरागादयोपित्रविष्टामोचकाएवेति ॥ नच
तिभ्यः विप्रोषः भजनेनवधिकमितिभावः ॥ २५ ॥ नन्वतएवाहतेषांपुत्रादिरूपेणावर्तेरतिचेन्नगाहयपंचमितिप्रप
त्रायाजननानांजनसमूहः तस्यानंदानांसंदोहंसमूहंप्रपयितुमितिनहिकपरपुत्रनादिनानाटंभकेरा

॥ ४४ ॥ [illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नेदेवस्मादितस्त्वात्भवश्चविंत्यानंतगुणत्वेनस्तवयंउक्तं यत्त्वस्मकं॥ केविज्ञजानीमइतिस्थिताः तानुपहसन्निवा।
हजानेन इतिकुमेमनस्वादीनांनवेवेभवं॥ ३७॥ जगदीशनाथभिमाने परित्यज्याहस्वतुजानीहिस्मतिस्वमहिमाने
श्वस्मदादीनांचज्ञानबलादिसर्वत्वमेवत्वेत्सियतः सर्वदृक् जगतांनाथस्त्वमेवेत्यतावतानेश्वतोमुमतास्यदंत।
गतप्रतत्स्यशरीभिंवितवार्पितं॥ इत्थदेवोकिंकवंभस्यापयतिश्वन्यादरेणनमस्करोतिश्रीकल्यकीर्ति॥ हृस्मिकृलपद्य।

ज्ञानेनपवजानंतकिंवहृनोक्तिमप्रभो॥ मनसोवपुषोवावोवैभवंतवगोचरः॥ ३७॥ स्वतुजानीहिसोकृ
लसर्वत्वंवेत्सिसर्वदृक्॥ त्वमेवजगतांनाथोजगदेतत्तवार्पितं॥ ३८॥ श्रीकल्याणमंदिरकुलपुष्क
रतोघदायित्मानिर्जराहिजपत्त्रदयिपृहितदायिन॥ उद्दमेशार्वहृवोद्दितिरास्तसमुग्नाकल्पमा।
नकेमर्हेभगवन्नमस्ते॥ ३९॥ ॥ ॥

सप्रीतिदात्वेन हेस्वर्योपमत्वमावभूमिः वनिर्जरादेवास्त्वहिजास्वपशवस्त्वतपवुउदधपः तेषां स्वहिका।
विवेनहेचंद्रोयमउद्दमेः॥ पापोउधर्मः तदेवशार्वतमः तवहवतीवितयास्वनेनहेद्ययोपम हेद्दियोपमे।
हेदितिरास्तसमुद्रेकृत्तिनोरास्तमाः केसादयः उपघ्नेवनेभ्याउद्वितीतिघुनः स्वर्योपमस्वर्यायुपमाविप
वनेतिमवाश्वकेमकेमभिव्याप्यसर्वेषामर्हेनपर जाभगवनस्त्राकल्पकल्पपर्यंतंतेतुभ्यंनमइति॥ ३९॥

धु॥

पादयोर्नवाभ्रभीष्टं सर्वतः पूजितमभिप्रेतं वा ॥४०॥ श्रुत्वा ताभ्यां तु नृत्तं ... म्यहृष्टेत्यर्थः स्वपुत्रं वं बहुला।
णांकथा पूर्वं सर्कः सत्वायोग्यस्मिन्स्तत ॥ यथा पूर्वं स्वकं तादृशं पुलिनं ॥४१॥ नृत्य एतावन्तं कालं कथयतेतत्रे
पविष्टाः कथं च तत्त्विपासादिविस्मरणामतस्थाह एकस्मिन्नितिस्त्रीकद्वयेन ॥ अत्रैवैपियाते श्राणेशाकृस्समे

॥ ममखेवनकमोदतुणकोनकडुनविलंविनपुत्रमुदेहुतं ॥ निखिलरूपमतोऽद्य पदं स्युतोऽवनुस
वः कलयनुवनमंगलं ॥४९॥ श्रीशुकः ॥ इत्यभिष्टूयपुत्रमावेत्रिः परिक्रम्य पादयोः ॥ नवाभीष्टं ज
गद्धातोर्धाम प्रस्तुपयत ॥५०॥ ततो नु दत्वाथ भगवान्स्व भुवं शागवस्थितां तान् ॥ वत्सान्पुलिनमानि
न्ये यथा पूर्वं सखं स्वकं ॥५१॥ एकस्मिन्नपियाते हि शाणे शावान्तरात्मनः ॥ कृस्समायाहतावा
जं तन्त्वणार्धं मेनिरेऽर्भकाः ॥५२॥ किं किं न विस्मरंतीह मायामोहितचेतसः ॥ यन्मोहितं जगत्स
र्वमभीक्ष्णं विस्मृतात्मकं ॥५३॥ ऊचुश्च सुहृदः कृष्णं स्वागतं तेऽतिरंहसा ॥ नैकोऽप्यभोजि कवल
एहीतः साधु भुज्यतां ॥५४॥ ततो हसन्हृषीकेशोऽभ्यवहृत्य सहार्भकैः ॥ दर्शयंश्चर्माजगरं
न्यवर्तत वनाद्व्रजम् ॥५५॥

न वापि विनापि विप्रयविहृदेतल्लोपि वत्सापि कोभवति तथापि मायाहताः त्रणार्धं मेनिरे ॥५२॥ यया मा
यया मोहितं जगत्सर्वमभीक्ष्णं पुनः पुनर्विस्मृतात्मकं विस्मृतस्वात्मा येन ततं तथा ॥५३॥ अनएवमहत्तुक्ष्म
तेव यारुप्रतिवेगेन स्वागतं ते सम्यगागतमेव वत्साः किंसमीपेभवन ॥ एकोपि ग्रासः कवो विनास्माभिर्नाभोजि
नभुक्तः ईत्परिहासाय पथिविदे पुत्ताः मुनामिति ॥५४॥ ५५॥

ज्प.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यशोदायाः सुतुनानंदस्य तनुनेति वक्तुमुचितः सैव दर्शितायद्वाकेचित्
दुः यशोदास्य तुनायोनंदस्य तुनेति २॥

श्री भा द टी ६५

प्रोद्दामोच्चैर्यो वेणुर्दलादिशृङ्गं तत्स्वरैः तेनाढ्यः संपन्नः गृणन्तउपलालनेनाह्वयन् गोपीदृगुत्सवदृशिः गोपीनां दृगुत्सवरूपा दृशिर्दर्शनं यस्य सः ॥४७॥ यशोदानंदसूनुनेति यद्वा यशोदां नंदयतीति यशोदानंदः सचासौ सूनुश्चेति यद्वा यशोदायाश्चानंदरूपः सूनुः तेनास्मान्महाव्यालादयमविता रक्षिता ॥४८॥ आशंके न ब्रह्मन्लोकसंस्वतोकेषु स्नेहवत्ता ब्रह्मत्वहम् ॥ धात्रैः निःसीमवत्सरूपे यथा कृष्णस्नेहपूर्ववहित्स्या।

बर्हप्रसूननवधातुविचित्रिताङ्गः प्रोद्दामवेणुदलशृङ्गरवोत्सवाढ्यः ॥ वत्सान्गृणन्ननुगगीतप
वित्रकीर्तिर्गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठम् ॥४७॥ अद्यानेन महाव्यालो यशोदानंदसूनुना ॥ हतो
(१ व्यालात्) ऽविता वयं चास्मादिति बाला व्रजे जगुः ॥४८॥ श्रीराजोवाच ॥ ब्रह्मन्परोद्भवे कृष्णे इयान्प्रेमा क
थं भवेत् ॥ योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यताम् ॥४९॥ श्रीशुक उवाच ॥ सर्वेषामपि भूतानां नृप
स्वात्मैव वल्लभः ॥ इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥ ५०॥ तद्राजेन्द्र यथा स्नेहः स्वस्वका
त्मनि देहिनाम् ॥ न तथा ममतालम्बिपुत्रवित्तगृहादिषु ॥५१॥

दिनास्वतोकेभ्योपि परभूते श्रीकृष्णे प्रेमाधिक्यमुक्तं तत्र हेतुं कथ्यतामिति ॥४९॥ श्रीकृष्णस्यात्मत्वा
दात्मत्वमभिसन्धानीयेभ्यः प्रेमादिकं पुत्रस्य तत इति वक्ष्ये प्रथमं तावदात्मनः स्वतः प्रेष्ठत्वम् अन्येषां तत
दुपाधिकं इति दर्शयति पंचभिः कृतैः तद्दर्शनादित्याह इतरे इति ॥५०॥ तस्मादेव कारणात्स्वस्वकात्मनि इ
हकारास्यरेण परिदेहेष्वात्मत्वाध्यासमात्रेण तस्यैव नु प्रेमतारतम्ये [illegible] दृष्टप्रमाणेन त्रिवर्धन
मवेति दृष्टोपि तनुं मृदामदृभेदेव विशेषमाह देहात्मवादिनामिति द्वाभ्यां ॥५०॥ ति

दृगुत्सव

६५

ध्या १

तेदेहमनुभवंतियेपुत्रादयस्तेतुनतथाप्रियतमाः यत्स्ववादिनोदेहइत्यर्थः ॥५१॥ यद्यस्मात्जीर्य
त्यपिअस्मिन्नपिमरणोपिजीविताशाभवतिअयंभावः ॥ नजीविष्यामीति [...] निश्चितेपिदेहेयन्ममास्यदे
हस्यदारुणत्वमेवसंपादकंतेइति ॥ अथवायद्यस्मिन्देहेजीर्यत्यपिजीविताशाबलीयसी [...] तस्यापिविवेकि।
नोयदाममताभावोभवतितदाआत्मविषयोनभवति ॥ अतस्तत्रनातीवास्थेतितदर्थमेवसकलमि

देहात्मवादिनांपुंसामपिराजन्यसत्तम ॥ यथाप्रियतमोदेहस्तथानह्यनुयेचतं ॥५१॥ देहोपि
ममताभाक्चेत्तर्ह्यसौनात्मवत्प्रियः ॥ यज्जीर्यत्यपिदेहेस्मिन्जीविताशाबलीयसी ॥५२॥
तस्मात्प्रियतमःस्वात्मासर्वेषामपिदेहिनां ॥ तदर्थमेवसकलंजगदेतच्चराचरं ॥५३॥ कृष्ण
मेनमवेहित्वमात्मानमखिलात्मनां ॥ जगद्धितायसोप्यत्रदेहीवाभातिमायया ॥५४॥ वस्तु
तोजानतामत्रकृष्णंस्थास्नुचरिष्णुच ॥ भगवद्रूपमखिलंनान्यद्वस्त्विहकिंचन ॥५५॥ सर्वेषा
मपिवस्तूनांभावार्थोभवतिस्थितः ॥ तस्यापिभगवान्कृष्णःकिमतद्वस्तुरूप्यतां ॥५६॥

त्यर्थः ॥५३॥ अतस्तमाहकृष्णमेवमिति ॥ नकेवलमात्मनामात्माअपितुजगतामपीत्याह ॥५४
वस्तुतइतिसर्वंजगत्कारणात्मकमितिकृष्णंजानतांपुंसांस्थावरंजं[...]गमंचसर्वंभगवद्रूपंभगवानेव
स्वरूपंयस्यनततोन्यत ॥५५॥ कुतइतितदाहसर्वेषामिति ॥ भावार्थःपरमार्थःभवतिभवत्यस्मिन्निति
प्राप्नुवत्कारणंतस्मिन्नभवतीतिस्थितःतस्यापिभवतःकारणस्यापिभगवान्श्रीकृष्णोभवत्कारणोऽप्र

समाश्रितायेपदपल्लवप्लवंमहत्पदंपुण्ययशोमुरारेः ॥५७॥

अविवेकदृष्ट्या ३

श्री
भाद
पूरी
६८

तस्मात्सर्वात्मकस्यैव परमार्थत्वात् ॥ तदेकशरणानामेवांतो हि सिद्धो मोक्ष इति प्रकरणार्थमुपसंह
रति समाश्रिता इति ॥ पुण्यं यशो यस्य स पुण्ययशाः स चासौ मुरारिश्च तस्य पादपल्लव एव प्लवः तं ये समा
श्रिताः महत्पदं महतां पदं आश्रयं यत्पदं महत्त्वं तत्पदं चेति तत्र येषां भवाम्बुधिर्वत्सपदमात्रं भवति किं
च परं पदं श्रीवैकुंठाख्यं पदं स्थानं भवति विपदां यत्पदं विषयः तत्पुनः कदाचिदपि तेषां न भवति न ततः पुन

समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः ॥ भवाम्बुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां
न तेषां ॥ ५७ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोहमिह त्वया ॥ यत्कौमारे हरिकृतं पौगंडे परिकीर्तितं
५८ ॥ एतत्सुहृद्भिश्चरितं मुरारेरघार्दनं शाद्वलजेमनं च व्यक्तेतरद्रूपमजोर्वभिष्टवं शृण्वन्गृण
न्नेति नरोखिलार्थान् ॥ ५९ ॥ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे निलायनैः सेतुबंधै
र्मर्कटोत्प्लवनादिभिः ॥ ६० ॥ इति श्रीभागवते दशमस्कंधे ब्रह्मस्तुतिर्नाम चतुर्द
शोध्यायः ॥ १४ ॥

गावर्तनैरस्पृष्टः ॥ ५७ ॥ एतत्सुहृद्भि रिति सुहृद्भिः चरितं मुखैस्तैरन्योन्यशिक्षया।
दीत्यादिनोक्तं ॥ अघार्दनमघासुरवधः शाद्वले जेमनं भोजनं च व्यक्ते ॥ तरदव्यक्तात्परं रूपं वत्सादित्वात्।
शुद्धसत्त्वात्मकं वत्सपालरूपं यद्वा व्यक्तेन दृष्टिविलासः तेनेतरत् रूपं अजस्य ब्रह्मणः उरुम
हानभिष्टवः तेन बालकृतास्तुतिमेतत् शृण्वन् गृणन्नरः सर्वपुरुषार्थानाप्नोति ५९ ॥ सिद्धपदपुटपदः ॥
व्याकरोति ॥ श्रीधरस्वामीयया मतिविपिस्तुतिः ॥ इति श्रीभावार्थदीपिकायां दशमस्कंधे चतुर्दशोध्यायः ॥

इति श्रीपरमानंद

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततः पुंश्चरद्गोधेनुपालनं पेटेनुकार्दनं ॥ कालियपत्न्युक्तोगोपासत्त्वां विनिर्मुष्यते ॥ श्रीमद्भावेक्षणनां पीना
कौमारे हत्वकादिकानेषां गांडेदेवैर्देव्यानामहन्मरमहानलः ॥ अद्भिकृष्णवेशेनहृष्याश्विनोन्मसंवीक्ष
तः कृष्णः प्रावेशयत्यक्षफलं तालीवकानने ॥ पशुपालसंमतौ पशुपालेनसंमतौ ॥ पशुपालानां वास
मतौ ॥ ईषद्बलातिरेकमनुकृतवेनाविस्मयः ॥ प्रतीवपुष्पहृंदावनेवक्षानः सर्वतः प्रसर्पणे ॥ १ ॥
स्वयंयोगृहाद्भिः तद्वनेप्राविशन ॥ २ ॥ तद्वनं निरीक्ष्य भगवान् श्रीकृष्णोरंतुमनोदधे कथंभूतं वनं

श्रीशुकः ॥ तत्र द्वौ गौरवयः स्थितौ वने बभूवतुस्तौ पशुपाससंमतौ ॥ रामश्वारयंतौ सखिभिः
समं पर्दे वृंदावनं पुण्यमतीवचक्रतुः ॥ १ ॥ तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्वयशो
बलान्वितः ॥ पशून्पुरस्कृत्य पशव्यमाविशद्विहर्तुकामः कुसुमाकरं वनं ॥ ३ ॥ तन्मंजुघोषालि
मृगद्विजाकुलं महन्मनः प्रख्यपयःसरस्वता ॥ वातेनजुष्टं शतपत्रगंधिना निरीक्ष्य रंतुं भगवान्म
नो दधे ॥ ४ ॥ सतत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ॥ स्पृशच्छिखान्वीक्ष्य व
नस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः ॥ ५ ॥

तद्वोषाये अलिमृगद्विजाः भ्रमरमृगपक्षि
णः तैराकुलं व्याप्तं महन्मनः प्रख्यपयः सरस्वता महतां मनसः ॥ प्रख्यं तत्सदृशं पयो यस्मिन् तत् सरः ॥
प्राप्रपवनेनाक्लिष्य [illegible] तेनवातेन निषेवितमुक्तं शतपत्राणि [illegible] विमलजुष्टं वनं [illegible] मतिं [illegible] स्वहृचितम
॥ अरुणापल्लवश्रियामहस्पृश [illegible] पादयोः [illegible] शाखाग्राणि येषां तान्वीक्ष्यग्रजं बले भ्रम्याह ॥ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग द
टी
८७

तरुजन्म येन कृतं तेन स्यात् तमसः पापस्यापहत्यै नाशाय अथवा येन वयाईं स्वरेण सर्वोपकारकं तरुज
न्म कृतं तेन पादाम्बुजं नमन्ति एवं श्लाघ्यापि जन्मनि यद् ज्ञानं रूपं तमोऽस्ति तस्यापहत्यै किं कृत्वा सु
मनःफलार्हणं विधाय ॥ ५ ॥ हे अनघ वने गूढमपि त्वां न त्यजंति त्वयि मनुष्यवेशेन हि गूढे सति मुनयो

श्रीभगवानुवाच ॥ अहो अमी देववरामरार्चितं पादाम्बुजं ते सुमनःफलार्हणं ॥ नमंत्युपादाय
शिखाभिरात्मनः तमोपहत्यै तरुजन्म यत्कृतं ॥ ५ ॥ एतेऽलयस्तव यशोऽखिललोकतीर्थं गा
यंत आदिपुरुषानुपदं भजंते ॥ प्रायोऽमी मुनिगणा भवदीयमुख्या गूढं वनेऽपि न जहत्यन
घात्मदैवं ॥ ६ ॥ नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वंति गोप्य इव ते प्रियमीक्षणेन ॥ सू
क्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान् हि सतां निसर्गः ॥ ७ ॥ धन्येयमद्य धर
णी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः ॥ नद्योऽद्रयः खगमृगाः सदयावि
लोकैर्गोप्योंतरेण भुजयोरपि यत्स्पृहा श्रीः ॥ ८ ॥

पि अलिवेशेन निगूढास्त्वां भजंतीत्यर्थः ॥ ६ ॥ इयान् हि सतां सर्गः स्वभाव इति वदंति यदस्ति प्रियं व
स्तु स्वस्मिन् तद्गृहमागताय महते समर्पयंति ॥ ७ ॥ तृणवीरुधस्त्वत्पादौ स्पृशंतीति तथा करजा
भिमृष्टाः करजैर्नखैः स्पृष्टाः सदयैरवलोकनैः श्रीरपि यस्मै स्पृहयति ॥ केवलं तेन भुजयोरं
तरेण वक्षसा गोप्यो धन्या इति ॥ ८ ॥

तृण

८७

एवं श्रीमद्वृन्दावनं प्रति प्रीतः सन्नग्रद्रेः समीपवर्तिसरित्तटे पशून्‌ संचारयन्सानुगो लोकप्रसिद्धाभिः
क्रीडाभिः प्रीतमना रेमे ॥९॥ तामेव वर्तिमाह क्वचिदिति दशभिः ॥१०॥ वर्हिणां नृत्यंतमनु अभिनृत्यति वर्हि
णामभिमुखं नृत्यती निवासस्तीन हासयन्गानेदयन् ॥११॥ चकोरादीननुकृत्य रौति कदाचित्सत्त्वानां

एवं वृन्दावनं श्रीमत्कृष्णः प्रीतमनाः पशून् ॥ रेमे संचारयन्नद्रेः सरिद्रोधस्सु सानुगः ॥१९॥ क्व
चिद्गायति गायत्सु मदान्धालिष्वनुव्रतैः ॥ उपगीयमानचरितः स्रग्वी संकर्षणान्वितः ॥२०॥ क्व
चित्स्वकलहंसानामनुकूजति कूजितं ॥ अभिनृत्यति नृत्यंतं वर्हिणं हासयन्क्वचित् ॥२१॥
मेघगंभीरया वाचा नामभिर्दूरगान्पशून् ॥ क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया ॥
चकोरक्रौंचचक्राह्वभारद्वाजांश्च वर्हिणः ॥ अनुरौति स्म सत्त्वानां भीतवद्व्याघ्रसिंहयोः ॥२२॥
क्वचित्क्रीडापरिश्रान्तं गोपोत्संगोपवर्हणं ॥ स्वयं विश्रमयत्यार्यं पादसंवाहनादिभिः ॥२४॥
नृत्यतो गायतः क्वापि वल्गतो युध्यतो मिथः ॥ गृहीतहस्तौ गोपालैः [illegible] लान्न
स्तौ प्रशशंसतुः ॥२५॥ क्वचित्पल्लवतल्पेषु नियुद्धश्रमकर्षितः ॥ वृक्षमूलाश्रयः शेते

मध्ये व्याघ्रसिंहयोः ताभ्यां भीतवद्द्रवति सत्त्वेषु पलायमानेषु स्वयं पलायते इत्यर्थः तयोः सत्त्वानां
वलोकनकालं भीतवद्द्रवतीति वा ॥१३॥ श्रीमत्प्रजं विश्रमयतीति विगतश्रमं करोति ॥१४॥ नृत्यदादीन
ऽवेतौ गोपानमिथः प्रशशंसतुः ॥१५॥ वाजने पल्लवादिभिर्निर्मितैः ॥१६॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० द० पत्री ९८

ईशचेष्टित इति निगूढस्वभावत्वेपि ग्रंथेनोक्तमीश्वरस्यैव चेष्टितानि दृश्यंते यस्मिन्सः ॥ १९ ॥ ईशचेष्टितमेवदर्श

यन्नेव तदनुरूपाणि मनोज्ञानि महात्मनः गायंति स्म महाराज स्नेहक्लिन्नधियः शनैः ॥ १८ ॥ एवं निगूढ

त्मगतिः स्वमायया गोपात्मजत्वं चरितैर्विडंबयन् रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्रामव

दीशचेष्टितः ॥ १९ ॥ श्रीदामा नाम गोपालो रामकेशवयोः सखा ॥ सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदम कृ

ब्रुवन् ॥ २० ॥ राम राम महाबाहो कृष्ण दुष्टनिबर्हण ॥ इतो विदूरे सुमहद्वनं तालालिसंकुलं ॥ २१ ॥ फलानि

तत्र भूरीणि पतंति पतितानि च ॥ संति किंत्ववरुद्धानि धेनुकेन दुरात्मना ॥ २२ ॥ सोतिवीर्योसुरो राम हे

कृष्ण खररूपधृक् ॥ आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः ॥ २३ ॥ तस्मात्कृतनराहाराद्भीतैर्नृभिर

मित्रहन् ॥ न सेव्यते पशुगणैः पक्षिसंघैर्विवर्जितं ॥ २४ ॥ विद्यंते भुक्तपूर्वाणि फलानि सुरभीणि च ॥ एष

वै सुरभिर्गंधो विषूचीनोवगृह्यते ॥ २५ ॥ प्रयच्छ तानि नः कृष्ण गंधलोभितचेतसां ॥ वांछास्ति मह

ती राम गम्यतां यदि रोचते ॥ २६ ॥ एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया ॥ प्रहस्य जग्मतुर्गोपै

र्वृतौ तालवनं प्रभू ॥ २७ ॥ बलः प्रविश्य बाहुभ्यां तालान्संपरिकंपयन् ॥ फलानि पातयामास मतंगज

इवौजसा ॥ २८ ॥ फलानां पततां शब्दं निशम्यासुररासभः ॥ अभ्यधावत्क्षितितलं सनगं परिकंपयन् ॥ २९ ॥

यितुमार्हसि श्रीदामेति ॥ स्तोककृष्णः कश्चित् ॥ तालालिसंकुले तालपंक्तिभिर्व्याप्ते ॥ २१ ॥ विषूचीनः सर्वतः प्रसृतः ॥ २५ ॥
सनगं सवृक्षं ॥ २९ ॥ ३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रत्यग्राभ्यां पश्चिमाभ्यां द्वाभ्यां का[?]शाहूं स तिगर्दभस्तानिशाह्वानुकरणं पर्यस्तनपवित्तोभयथावदिस्य
र्धः॥१९॥उपक्रोशगर्दभः पराक्कुप्रतिमुखः प्रपरोपश्चिमोवलायवल्लेहंते॥२०॥न्नृणराजस्तालः॥२१॥
उन्मृष्टेनस्वरदेहेहूंते साहतोः वक्रंपिरेश्रकंपयन॥२२॥पश्चिमत्रिदं विसंज्ञे तंज्ञर्धतंन्नरुपरदूवग्रथि

समेत्यतरसाप्रत्यग्राभ्यांपश्चांवलंबली॥ निहन्योरसिकाशाह्नूंमुंचयर्यस्तवरः॥२३॥ पु
नरासाद्यसरस्त्रुयतांकस्थितः॥ वरणावपरोगतन्नूवलायप्रांदिपद्रुमा॥२४॥ मतेगृहीताय्र
परोभ्रामयित्वेकपाणिना॥ विनेपत्तृणराजाग्रेभ्रामणत्यक्तजीवितं॥२५॥ तेनाहतोमहा
तालोवेपमानोमहाक्रियः॥ पार्श्वस्थंकुपयन्भग्नः सचान्यमपिचापरं॥२६॥ वलस्तोल
पोत्सृष्टस्वरदेहहतोहतः॥ तालास्त्रकंपीविसर्वेमहावातेरितादूव॥२७॥ नेतल्लिवभगव
तिस्वनेतन्नगर्दभस्वरे॥ उतेप्रोतामितद्यास्मितलंतकेषमयथ्यापटः॥२८॥ ततः कृत्स्नचरामं
चतालवयोधनुकस्यये॥ क्रोष्टारोभ्यद्वन्नदेमरत्राहतबाधवाः॥२९॥ तोलानापतनः
कृत्स्नोरामस्त्रनपलीलया॥ गृहीत्वपश्चास्तरणास्मृाक्षिप्तोन्नृणराजसु॥३०॥ फलप्रकर
संकीर्णादेत्यदेहेर्गतासुभिः स्राजन्भूंसतालाग्रेर्येनैरिवनभस्तले॥३१॥
तंघ्रोस्नंनिपुंन्नकेनदुपरदेवसंग्रथितंसर्वनोवस्तमलंवर्ततद्रत्यर्थ॥३२॥ घनैनैर्नभरस्वभुवस्तलंराज
तेचफलपुष्करसंकीर्णमितिदेत्यदेहैः सतालाग्रेशुसंकीर्णमित्यरुणास्थितनीसहन्नसारचपः

क्रोष्टारव[२]

॥ हरिवं ६७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री मा र मूर्ती ६४

श्रावृन्दनवमभवत्यत्र ॥४०॥ गौराङ्गोऽभिः कुतेतु कुञ्जे तले षु वङ्गं वहेवन्यानि प्रसूनानि वयस्यस्त्वविरमी
तरुणिवारुह्य सञ्चरन्ते वने चरितुं तितं रेणुः दिदितिनादर्शनो कोवन्तुप्रकारणाया सान्ता: ॥४२॥ मुकुन्दस्य
भुवपयनान्तं सारवमपुष्पश्रीह्रियो विरह स्त्रसमाज्ञानेतापे ॥ सवनासां समन्त्कृतिं रजोकाच समन्त्कृतिः कथ
तयोस्तसुमहत्कर्मनिशम्य विबुधादयः ॥ मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ॥४३॥ अथ
तालफलान्यादन्मनुष्यागतसाधमाः ॥ तृणं वुपवृः चेरुहं तत्पेनुककानने ॥४॥ कृष्णः कम
लपत्रातः पुण्यपञ्चवणाकीर्तितः ॥ स्तूयमानोऽनुगैर्गोपैः साग्रजो व्रजमाव्रजत ॥४५॥ तं गोरजः कु
रितकुन्तलवद्धवर्हवन्यप्रसूनरुचिरेक्षणचारुहासं ॥ वेणुं क्वणन्तमनुगैरनुगीतकीर्तिं गो
प्यो दिदृक्षितदृशोऽभ्यगमन्समेताः ॥४६॥ पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गैः तापं जहुर्विरहजं
व्रजयोषितोऽह्नि ॥ तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहासविनयं यदपाङ्गमोक्षं ॥४६॥
तयोर्यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले ॥ यथाकामं यथाकालं व्यधत्तां परमाशिषः ॥४४॥
गताध्वानश्रमौ तत्र मज्जनोन्मर्दनादिभिः ॥ नीवीं वसित्वा रुचिरां दिव्यस्रग्गन्धमण्डितौ ॥४५॥ ज
नन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ ॥ संविश्य वरशय्यायां सुखं सुषुपतुर्व्रजे ॥४६॥
एवं स भगवान्कृष्णो वृन्दावनचरः क्वचित् । ययौ राममृते राजन्कालिन्दीं सखिभिर्वृतः ॥४७॥

वाक्कृनानामाहमवीरेनिसल ज्ज्हासेन विनयो यथा भवति तथा यदेनत ॥ किंवापांगमोक्षं करादव
धीने तथा तासमन्त्कृतिं प्राप्यत्न यथं ॥४६॥

समधिगम्यस्वी कृत्य

६४

संप्रतिसम्यगुपवर्णताम्बाभास्कृतिर्ये: तेसंप्रतीतस्मृतयः यद्भास्स्यकृष्णतीलाश्रतिशमास्कृतिर्ये:नेत्रयो ५।
एतदत्वसंमत ॥ ५२ ॥ इति श्रीभागवतदीपिकायां दशमस्कंधे पंचदशोध्यायः ॥ षोडशेकालियस्याहोविग्रहे
यमुनाह्रदेतत्रत्यौषधिभिः स्नातेनाथकृष्णेननानुग्रहः पुनः हत्वारासभदैतेयान्जग्धातालफलान्मले ॥ श्री
एवंसभगवान्कृष्णोवृंदावनचरःक्वचित् ॥ ययौराममृतेराजन्कालिंदींसखिभिर्वृतः ॥ ४७ ॥
अथगावश्चगोपाश्चनिदाघातपपीडिताः ॥ दुष्टंजलंपपुस्तस्याः तृष्णार्ताविषदूषितं ॥ ४८ ॥ ग्रा२
विषांभस्तदुपस्पृश्यदैवोपहतचेतसः ॥ निपेतुर्व्यसवःसर्वेसलिलांतेकुरूद्वह ॥ ४९ ॥ वीक्ष्य
तान्वैतथाभूतान्कृष्णोयोगेश्वरेश्वरः ॥ ईक्षयामृतवर्षिण्यास्वनाथान्समजीवयत् ॥ तेसंप्र
तीतस्मृतयःसमुत्थायजलांतिकात् ॥ आसन्सुविस्मिताःसर्वेवीक्षमाणाःपरस्परं ॥ ५१ ॥ अन्व
मंसततद्राजन्गोविंदानुग्रहेक्षितम् ॥ पीत्वाविषंपरेतस्यपुनरुत्थानमात्मनः ॥ ५२ ॥ इतिश्री
भागवतेदशमस्कंधेपंचदशोध्यायः ॥ १५ ॥ श्रीशुकः ॥ विलोक्यदूषितांकृष्णांकृष्णःकृष्णाहि
नाविभुः ॥ तस्याविशुद्धिमन्विच्छन्सर्पंतमुदवासयत् ॥ १ ॥ श्रीराजा ॥ कथमंतर्जलेगाधे
न्यगृह्णाद्भगवानहिं ॥ सवैबहुयुगावासंयथासीद्विप्रकथ्यतां ॥ २ ॥
तोनृत्यत्फणारंगे [illegible] कालियस्यकलानिधिः ॥ उद्वासयत् निःसारितवान् ॥ ॥ बहुनियुगा।
न्यावासोयस्यतमहिंसवैग्राहिः भुजगराजपितस्मिन्नंतर्जलेपयायेनप्रकारेणासीत्तथवाबहूनियु
गानिआवासोयथाभवतितथातेनप्रकारेणासेवेतवासीदितिकथ्यतामिति ॥ ॥

श्री भा द पू ७

गोपालेन यद्दारुणं चरितं तदेवाश्चर्यं तेषु तत्र कथ्यतामिति ॥३॥ श्रप्यमाणं पच्यमानं पयो यस्य सः। अत उपरिगाः ख्व
तेः खगाः यस्मिन्पतन्तीति ॥४॥ किंच विप्रुष्मता अंबुकणयुक्तेन विषोदकतरंगस्पर्शमारुतेनाभिमर्शिताः स्पृष्टाः
पुष्प तेरगा म्रियन्ते मरुद्रष्टासीदिति ॥५॥ तं कालियं चंडोवेगो यस्य तं विषमेव वीर्यं यस्य तं कदेवमिति किंवि
दैवो स्रो यस्य सर्वसंवाभाविना स्त्रीकृत्य लवणास्पर्शभागेन तत्पकः तन्त्री क्रदेवमारुह्य वा ॥ अथवा अत्रम्नता।
न तुष्टः

ब्रह्मन्भगवतस्तस्य भूम्नः स्वछंदानुवर्तिनः। गोपालोदारचरितं कस्तृप्येतामृतं जुषन् ॥३॥ श्रीशुक उ०।
वाच ॥ कालिंद्यां कालियस्यासीद्ध्रदः कश्चिद्विषाग्निना ॥ श्रप्यमाणपया यस्मिन्पतन्त्युपरिगाः ख-
गाः ॥४॥ विप्रुष्मता विषदोर्मिमारुतेनाभिमर्शिताः ॥ म्रियन्ते तीरगा यस्य प्राणिनः स्थिरजंगमाः ॥५॥
तं चंडवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः ॥ कृष्णः कदंबमधिरुह्य ततोऽतितुं-
गमास्फोट्य गाढरशनो न्यपतद्विषोदे ॥६॥ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगवि-
षोच्छ्वसिताम्बुराशिः पर्यक्प्लुतो विषकषायविभीषणो-
र्मिर्धावन्धनुःशतमनंतबलस्य किं तत् ॥७॥

मारुह्य अत्युच्चं नतरां कल्मताक्रांत नाघदिति पुराणेन तं आस्फो-
बाहुं करतलेन आहत्य गाढं दृढं बद्धा रशना कटिबंधनवस्त्रं येन सः ॥६॥ तदा सर्पह्रदः पुरुषश्रेष्ठस्य पत-
नभरेण संक्षोभिता ये नागास्तेषां विषैरुच्छ्वसितोम्बुराशिः यस्य सः। विषेण कषायीकृताः भयंकरा ऊर्मयो यस्य
सः। पर्यक् परितो धनुःशतं प्लुतः सन् ॥ नैतच्चित्रमित्याह ॥ अनंतबलस्येति ॥७॥ ॥ ॥

७

प्र

भुजदंष्ट्राहतोरस्कश्चोषं कृष्णाननः समदनाभिभवे च निरीक्ष्य तं सहमानः ॥ सर्पः स्मरसरल्लस्माज्ञ
गामसंभुरवमागतभ्रमी मंत्वामीममगृहमायाति ॥ ममात्मानुकृष्णमनं करणीयमिति ॥ ५ ॥ प्रेक्षणी
यस्य सुकुमारस्य घनवडतलस्थितं श्रीवत्सपीतवसनं हृदे विहरंतं ॥ श्रीवत्सेन संयुक्तमुल्लसत्पीतं व
तस्य हृदे विचरतो भुजदंडदृष्टिवाद्दोषमंग ॥ वरवारणविक्रमस्य ॥ अंकृत्यतनस्व सदनाभिभ
वं निरीक्ष्य वत्सः श्रवाः समसरतदम्यमाणः ॥ ८ ॥ तं प्रेक्षणीयसुकुमारघनावदातं श्रीव
त्स पीतवसनं स्मितसुंदरास्यं क्रीडंतमप्रतिभयं कमलोदरांघ्रिं संदष्टमर्मसुरुषा भुजया
चकार ॥ ९ ॥ तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपालघाताः ॥ कृष्णे
र्पितात्मसुहृदर्थकलत्रकामाः दुःखानुशोकभयमूढधियो निपेतुः ॥ १० ॥ गावो वृषा वत्स
तर्यः क्रंदमानाः सुदुःखिताः ॥ कृष्णे न्यस्तेक्षणाभीता रुदंत्य इव तस्थिरे ॥ ११ ॥ अथ व्रजे
महोत्पातास्त्रिविधा ह्यतिदारुणाः ॥ उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः ॥ १२ ॥
तानालक्ष्य भयोद्विग्ना गोपा नंदपुरोगमाः ॥ विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतम् ॥
मतं तस्य तं भुजया भोगेन वक्रादष्टवेष्टयत ॥ स ॥ तत्प्रियो येषां ते तत्प्रियाः ते वने सखायः इति च ॥ १० ॥ न
याभुवि कंपादयः दिवि उल्कापातादयः ॥ आत्मनि वामनेत्रस्फुरणादयः आसन्नभयशंसिनः ॥ ग्री
तेषां ते ॥ १४ ॥ तानालक्ष्येति नानालक्ष्य गोकुलाद्रेरादयो गोपा निर्गमुर्विनिर्ग[illegible] नीयेनान्वयः ॥ भयो

श्रीभा॰ द॰ स्कं॰ ... ८९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग पु ८

नैनं विदंतीत्यतद्विदः ॥ १४ ॥ पशूनामिव वृत्तिर्येषां ते ॥ पतिवत्सलावाय पशुपुंवभृत्तेषु वृत्तिः स्थितिर्येषां
वाहेऽस्मिंग ॥ १५ ॥ कांतवानेंवलोवलवद्रु ॥ १६ ॥ भगवंते ललंतयंति येतितैः पदैः सूचितया पदव्या मार्गेण ॥ १७
देमेमंगानश्यकारमाहतेऽइति ॥ विरहितेः श्रीकृष्णस्य ॥ अन्येषां पदानि मेतरांतत्रेमध्ये मध्ये तन्नदपोहेन यथा

तैइ विविमिन्नेर्विधृतं मनाग्रामनतद्विदः तत्प्राणान्नमनस्कालेडः खशोकभयातुराः ॥ १४ ॥ प्रबाल
लवद्भवनिताः सर्वेगपश्रुत्यय ॥ तिजेगमुगोकुलादीनाः कृष्णदर्शनलालसाः ॥ १५ ॥ तोलस्थाक
त्रस्यीत्यभगवान्नाथवोवलः ॥ प्रद्दस्य किं विज्ञोवाव प्रभावज्ञोनुजस्मयः ॥ १६ ॥ तेचेष्यमाणाद्यितं
कृष्णस्यचितयापदे ॥ भगवल्लक्षणैर्जुमुः पूदव्याप्सुनातंद ॥ १७ ॥ तेनवन्नयाबुयवोकृशाणाविषु
जोपपन्नानि पदानि विरपचेनु ॥ मार्गेणवामनन्यदेतांतरंवे निरीक्ष्यमाणाय युरेगमसवराः ॥ १ ॥ प्रेनईदे
भुजगमोयपवीतमारान्कृष्णनिरीहमुपलभ्यजलाशयांते ॥ गोपांस्त्रमूर्छिविषयेणान्यविनिः पश्चा
बुसेकेदतः पश्चकलपमापुरानीः ॥ १८ ॥ गोप्याजवंकमनेसोभगवृन्पनेततन्सोहहरास्मितविः
लोकगि वः सर्वत्पः ग्रसेदिहिनाप्रियतमेभृशातुः खतप्ताः ॥ अन्यंप्रियव्यतिहृतेददृशुः दिलो
गवांकृतीनां मार्गे समवरायोगिनः ॥ तत्रउपाध्यपवोदनयथापवतवेमृगयेतेतद्वहितिभावः ॥ १९ ॥ ततश्च
सवेग्रामीस्वेष्टितं श्रीकृष्णं हरानिरीक्ष्यगोपांस्त्रय मृत्तृवत्यातपानिरीक्ष्यानीः पवेमोहमापुः ॥ २० ॥ श्री
येणश्रीकृष्णेनविरहितंते लोकं शून्यं ददृशुः ॥ २१ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रवन्यमागतिं श्रीकृष्णसंशरणे गोकुले निरीक्ष्य प्रतपवाल्महेतुः स्वगोकुलमतिदुःखितमातायडुंग
वंपातुन्नगावेपादुरतिष्ठदित्यन्वयः ॥ २१ ॥ तस्यमध्यमानेनवपुषाप्यपितामधारीरः ॥ भुजंगकेंडलो
ऽन्मुच्यतंतनुक्काउपितः स्वफणानुत्रमयञ्चसन्केवलमीलितोणः तस्यौकथंभूतः श्वसन्श्वसनरं
ताः कृस्समानरम्यपत्यमनुश्रविष्टांतुल्यवयाः समनुसृत्यश्चवःस्ववंत्यः ॥ तास्तावनप्रिय
कृयाः कथयंत्यश्चासन्कृस्मानने पिंतदृशोमृतकप्रतीकाः ॥ २१ ॥ कृस्सप्राणान्निर्विशतोनेद्रा
दोनुवीक्ष्यतेहृदे ॥ प्रत्यक्षेयस्सभगवान्नामः कृस्मानुभावविन् ॥ २२ ॥ इत्यंस्वगोकुलमनन्यगतिं
निरीक्ष्य सस्त्रीकुमारमतिदुःखितमात्महेतोः ॥ आलायमर्त्यपदवीमनुवर्तमानः स्थि
तासुहृदंमुदतिष्ठदुरंगवंधात ॥ २३ ॥ तन्मध्यमानवपुषाप्यपितामश्रीगः सकोत्रमयञ्चउ
पितः स्वफणान्भुजंगः ॥ तस्योच्छ्वसनश्वसनरंध्रविषांवरीषस्तब्धेतणोल्मुकमुखो
हरिमीक्षमाणः ॥ तंजिह्वयाद्विशिखयापरिलेलिहानेद्वेस्रक्विणीत्यतिकरालविषा
ग्निदृष्टिः ॥ क्रीडन्नमुंपरिससारयथाखगेंद्रो वभ्रामसोप्यवसरंप्रसमीक्षमाणः ॥ २५ ॥
ध्रुवनासिकाविवरेषुविषयंयस्यसतथा ॥ अंबरीषोमंडकपाभाजनंतेनद्वत् ॥ संतप्तानिनेत्राणियस्य ।
तथाउल्मुकानिमुखेयस्यसच ॥ २४ ॥ हरिस्वक्रीडेनसर्पंपरिससारपरितोवभ्रामभ्रांतिकरालेविष
ग्निपूत्कारदृष्टिर्यस्यतेजिह्वयाद्विशिखयेतिशतिम

॥ ७८ ॥ सिद्ध

श्री भाग दः पु

परिभ्रमणेनैव हतं तेजो यस्य तं तदुन्नतोऽत्रांसो यस्य तेन तस्य मूर्धसु येव रत्ननिकराः तेषां स्पर्शेनात्यरुणां पादांबु
जं यस्य तेन तं केवलं भुविमस्तकं यथेन नर्त्तनेनत्राह ॥ अखिलकलानामादिगुरुः ॥ २६ ॥ शतैक शीर्ष्णः शतं एका
नि शुल्यानि शीर्षाणि यस्य तस्य क्षीणायुषो पि तु न भ्रमतः यद्यच्छिरो न नमते लब्धं तानज हानि नृत्न बलेना
ङ्घ्रिपातैः तत्तन्ममर्द तत्रावश्यं नेतोतु खेभ्यः ॥ नस्तेनासाविवेभ्यस्तत्र स्तकांवमन्नानागः ॥ परमकश्मलं प्राप २८

एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरःस्वधिरूढ आद्यः ॥ तन्मूर्धरत्ननिकरस्पर्शा ।
तिताम्रपादांबुजोऽखिलादिगुरुर्ननर्त्त ॥ २६ ॥ तं नर्त्तुमुद्यतमवेक्ष्य तदा तदीयगंधर्वसिद्ध
मुनिचारणदेववध्वः प्रीत्या मृदंगपणवानकवाद्यगीतपुष्पोपहारस्तुतिभिः ॥ सहसोपसेदुः ॥ २७ ॥
यद्यच्छिरो न नमतेंग शतैकशीर्ष्णस्तत्तन्ममर्द खरदंडधरोंघ्रिपातैः क्षीणायुषो भ्रमत उल्बणमा
स्यतोसृङ्नस्तो वमन्परमकश्मलमाप नागः ॥ २८ ॥ तस्याक्षिभिर्गरलमुद्वमतः शिरस्सु यद्यत्स
मुन्नमति निःश्वसतो रुषोच्चैः नृत्यन्पदानुनमयन्दमयांबभूव पुष्पैः प्रपूजित इवेह पुमान्पुराणः ॥
२९ ॥ तच्चित्रतांडवविरुग्णफणातपत्रो रक्तं मुखैरुरु वमन्नृप भग्नगात्रः स्मृत्वा चराचरगुरुं पुरुषं पुरा

पुनरपि समादञ्जासि नाव यत्सम उन्नमति तत्तत्पदा यातेनानुनमयन् इहाशिन्नेव महे हृष्टैर्गंधर्वादिभिः
शेषाक्षतः पुराणं पुरुषं दृष्ट्वा यथाशोभनेदतः पुष्पैः प्रपूजितः ॥ यद्वा तदा गंधर्वादिभिः पुष्पैः प्रपूजितः गो
पैः पुराणः ॥ पुरुषः स्वयं दृष्टः इति यद्वा पुष्पैः ॥ स प्रपूजितः स्वप्रमत्तः सन् तं दमयांबभूव तेन हि तं कृतवानित्यर्थः ॥ २९

गर्भं जगतो ति यस्य तस्यातिभरेणात्र वसत्वमाक्रांते पार्ष्णिः पादपृष्ठं आद्यं श्रीकृष्णं विस्रस्तसमानावंदयो यासां
ताः शरणं प्रपन्नाः सन्त्यः ते प्रणेमुः सुविग्नमनसो विह्वलचित्ताः भुवीति॥ तस्मिन् स्थाने जलादधस्ताद्दृ
ती रेवाशमलस्य पापात्मनोऽपि भर्तुर्मोक्षेप्सवः॥ भर्तुर्यच्छमलं तस्य वा भूतपतिं प्राणिमात्रस्य पतिं शरणदं
माप्रपेदुः॥३१॥ प्रथमं तावत् कुपितं भगवंतं दंडानुमोदनेनोपशमयंत्यः स्तुवंति न्याय्यो हीति त्रयं दंडानु
य

कृत्स्नस्य गर्भं जगतोऽतिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणातपत्रं॥ दृष्ट्वाहिमाद्यमुपसेदुरमु
ष्य पत्न्य आर्ताः श्लथद्वसनभूषणकेशबंधाः॥३१॥ तास्तं सुविग्नमनसोऽथ पुरस्कृतार्भाः कायं
निधाय भुवि भूतपतिं प्रणेमुः साध्व्यः कृतांजलिपुटाः शमलस्य भर्तुर्मोक्षेप्सवः शरणदं शरणं
प्रपन्नाः॥३२॥ नागपत्न्य ऊचुः न्याय्यो हि दंडः कृतकिल्बिषेऽस्मिंस्तवावतारः खलनिग्रहाय॥ रिपोः
सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन्॥३३॥ अनुग्रहोऽयं भवतः कृतो हि नो दंडोऽ
सतां ते खलु कल्मषापहः॥ यद्दंदशूकत्वममुष्य देहिनः क्रोधोऽपि
मोदनं षड्भिर्देशाभिर्हेतुः पि तेऽनुग्रह एव सम्मतः॥३४॥ स्तुतिः प्रार्थनं पंचभिः श्लोकैः
ततः पद्यद्वयोपचितो न वा निग्रहानुग्रहलक्षणं वैषम्यमित्याहुः॥ धत्से दममिति॥ अनुशंसन् आलोचय
न॥३३॥ निग्रहोऽप्यनुग्रहायेत्युक्तं इदानीमनुग्रह एवायं न निग्रहस्तथाहुरनुग्रह इति॥ नोऽस्माकं यस्मादमु
ष्य सर्पत्वं ह पापते प्राप्तं तस्मात् स्मलपापनिवर्तको दंडोऽनुग्रह एव क्रोधोऽपि तेन प्रतीयमानोऽपीत्यर्थः॥३४॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मदं ब्रवीयमनुग्रह इति तस्य एवं शुण्ण समभिनंदति तपइति ॥ स्वयं मानर हि तेन अन्येभ्यो मानदेन च सर्वजीव
तीति सर्वजीवः ॥२५॥ न न पश्यानि मित्र पुष्यभाग्योदयः किं न विंत्येन वक्रूपा वैभवमित्याहः ॥ श्लोकत्रयेण ॥२६
कस्यानुभाव इति तपस्यादिनाश्लाघ्योपि वस्याः ॥ श्रियाः प्रसादमिच्छंतिसा श्रीर्लललनापि श्रीदेवललेना

तपः सुतप्तं किमनेन पूर्वं निःसीममानेन स्वमानदेन ॥ धर्मोथवा सर्वजनानुकंपया यतो भवांस्तुष्यति
सर्वजीव ॥२५॥ कस्यानुभावेस्य न देव विग्रहे तवांघ्रिरेणुस्पर्शाधिकाभः ॥ यद्वांछया श्रीर्ललनां च
रत्नयो विहाय कामान्तु चिरं धुनत्व्रता ॥२६॥ न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यं
त्यं ॥ न योगसिद्धीरपुनर्भवं वा वांछंति यत्पादरजः प्रपन्नाः ॥२७॥ न देहिनां यो पुरुराप मन्ये समस्तमो
नतिः क्रोधवशोप्यहीशः संसारचक्रे भ्रमतः शरीरिणोपरिच्छ ॥
तः स्यादिभवः समस्तः ॥२८॥ ॥

उत्तमास्तीयस्मादेवं त्रिस्पर्शाधिकरस्य वांछयान पश्यादिश्रचरत ॥ अस्य सर्पस्य सा किं हृतं (वान) इति को वेत्ती
त्यर्थः ॥२६॥ यत्तव पादरजः प्रपन्नाः प्राप्ताः पारमेष्ठ्याधिपत्यमन्यते ॥२७॥ अहो तदेषः अप्रयत्न एव प्राप्य प्राप्नः
अन्यो हंत्वादिभिरपि दुर्लभः कथं भूतं पादरजः यदिच्छतः संत्यमेव भवति निशार्थं यत एवं समस्तः प्राप्तदपव

७३

नमस्तुभ्यं भगवते अचिंत्यैश्वर्यादिगुणाय तदुपादनाय पंचभिः श्लोकैर्विशेषणानि पुरुषाय पूर्वं
देहेषु पूर्णांतर्यामिरूपेणावर्तमानाय ॥ महात्मने ॥ एवमप्यपरिच्छिन्नाय कुतः भूतावासाय आकाशाद्या
श्रयाय एतदपि कुतः पराय कारणाय किंच परमात्मने कारणातीताय ॥ ३९ ॥ कारणत्वे कारणातीतत्वे
च समर्थयितुमाहुः ॥ ज्ञानविज्ञाननिधये ज्ञानं चित् स्थितिः विज्ञानं चिच्छक्तिः उभयोर्निधये ताभ्यामुत्कृष्टो।
यत्कथं तथा च मतं जं ब्रह्मणे तेन तथात्वे अनंतशक्तये ब्रह्मणो कर्तृत्वं भूताय अगुणायाविकाराय कथंभूताय अनंत

नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ भूतावासाय भूताय पराय परमात्मने ॥ ३९ ॥ ज्ञानवि
ज्ञाननिधये ब्रह्मणेऽनंतशक्तये ॥ अगुणायाविकाराय नमस्ते प्राकृताय च ॥ ४० ॥ काला
य कालनाभाय कालावयवसाक्षिणे ॥ विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ॥ ४१ ॥

प्राकृतये प्राकृताय प्रकृतिप्रवर्तकाय अप्राकृतायेति वा अप्राकृतत्वं यानेन शक्तिगुणाय अयमर्थः
अगुणत्वादविकारं ब्रह्मलक्षणमात्रत्वात्कारणातीतं प्रकृतिप्रवर्तको ऽनंतशक्तिः विज्ञाननिधि
त्वादीश्वरः कारणं तदुभयात्मने नमः इति ॥ ४० ॥ अनंतशक्तित्वात्कालशक्त्या विश्वसृष्ट्यादिहेतुत्वे।
नमस्यंति ॥ कालाय कालस्वरूपाय कालनाभाय कालशक्त्याश्रयाय कालावयवानां सृष्ट्या
दिसमयानां साक्षिणे तत्र विश्वाय विश्वरूपाय तर्हि किं जडोऽहं नहि तदुपद्रष्ट्रे द्रष्टृमात्राय किं
न तत्कर्त्रे न च केवलमात्राय विश्वहेतवे सर्वकारणाय पाय ॥ ४१ ॥

नच

श्रीभाग द पू ७८

नदेवाङ्गः भूतेति ॥ आशयः चित्तं भूतादिरूपाय ॥ अतः सर्वकारणरूपायेति ॥ अहंकारात्मतयानसस्पेतित्रि
गुणेनेति एवं सृष्ट्यादिकार्यं यस्य त्रिगुणोऽभिमानः तेन गूढः स्वांशभूतानामात्मनामनुभूतिर्येन तस्मै ॥ ४२ ॥ ननु
हंकारानात्मत्वे इति त्वं वेत्ति ॥ नमोनंतायाहंकार्यैरविच्छेदात ॥ अतः सूक्ष्मायादृश्यत्वात् अत एव कूटस्था
यषडुपाधिकृतविकाराभावात ॥ अत एव विपश्चिते सर्वज्ञाय एवं वस्तुतः स्वतत्त्वमुक्त्वा मायया तेन पुनः स्तुवं
ति नानावादानुरोधाय आलिनामात्मसर्वज्ञः किं वित्तः बद्धः मुक्तः एकोनेक इत्यादि नानावादानामनुसरण।
द्विमाय यानुवर्तनेयस्तस्मै किंच वाच्यवाचकशक्तये अभिधानाभिधेयशक्तिभेदादपि नानात्वेन प्र।

भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने ॥ त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ॥ ४२ ॥ नमो
ऽनंताय सूक्ष्माय कूटस्थाय विपश्चिते ॥ नानावादानुरोधाय वाच्यवाचकशक्तये ॥ ४३ ॥ नमः
प्रमाणमूलाय कवये शास्त्रयोनये ॥ प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ॥ ४४ ॥ नमः कृष्णाय रामाय
वसुदेवसुताय च ॥ प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ ४५ ॥ ॥ ॥ लीलायेत्यर्थः ॥ ४३ ॥ अनात्म

तत्त्वमेव हेतुतेरणापि मच्चवंद्यः त्वं वेत्ति ॥ नमः प्रमाणमूलाय प्रमाणकार्यः तत्त्वानुभवः ॥ प्रमाप्रमायोगव
वाद्धि चेष्टमणं वक्तारादीनां वक्तृत्वादिरूपाय अत एव कवये यस्य यंतविरूपेत्तज्ञानाय कुतः शास्त्रयोनये वेदा।
त्मकांतिः प्रकाशाय ॥ किंच प्रवृत्ताय निवृत्ताय निगमाय च नमो नमः ॥ ४४ ॥ अनावृत्तेनापुर्वेणादेव चतुर्मूर्तिरूपेण स
र्वोपास्यत्वेन नमस्यति नमः कृष्णायेति श्लोकद्वयेन ॥ रामाय संकर्षणाय वसुदेवसुताय वसुदेव शौरिरितं श्रु
द्धसत्वं तत्प्रकाशमानाय वासुदेवायेत्यर्थः ॥ सात्वतां भागवतानां पतये भानोः कादिना पालकाय एवंवितस्मै

नये श्रीकृष्णाय तुभ्यं नम इति ॥ ४५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कथंवर्त्तमानत्वंप्रतीतिरित्यतआहः नमोगुणप्रदीपायेतिगुणानंतःकरणानिनानिप्रदीपयतिप्रकाशयतीतितथा
त्मैचित्ताधिष्ठातृत्वेनचतुर्मूर्त्तित्वमित्यर्थः ननुतथाप्येकस्यैवकथंचतुर्मूर्त्तत्वमताहः गुणात्मच्छादनायचैतेनै
वगुणैरुपासकानांफलैर्वैचित्र्यतयात्मानमाच्छादयनानात्वेनप्रतीतायेत्यर्थः ननुकथंतर्हिप्रतीतिः अतउक्तं
गुणवृत्त्युपलक्ष्यायेति॥ चित्तादीनांवृत्तिभिर्व्यवसायादिवृत्तीनामुपलक्ष्यायगुणद्रष्टृगुणसाक्षिणेकथं।

नमोगुणप्रदीपायगुणात्मच्छादनायच॥ गुणवृत्त्युपलक्ष्यायगुणद्रष्ट्रेस्वसंविदे॥ ४९॥ अव्याकृ
तविहारायसर्वव्याकृतसिद्धये॥ हृषीकेशनमस्तेस्तुमुनयेमौनशीलिने॥ ५०॥ ॥ ॥ ॥॥॥

त्विदुपलक्षणप्रवनेत्तियइत्याहः स्वसंविदेस्वगोचरायेत्यर्थः॥ ४ ॥ ९ ॥ अगोचरत्वादुपलक्षत्वंदर्शयेत्यतोनम।
स्यादिति॥ अव्याकृतविकारायप्रवाप्तकर्ममहिम्नेइत्यर्थः॥ सर्वव्याकृतसिद्धयेसर्वकार्यात्मानिप्रकाशहेतवे।
तेनोपलक्षणायोग्यायेत्यर्थः॥ उपलक्षणानंतरमाहः॥ हृषीकेशकरणप्रवर्तककिंविषयालिप्सया न।
मुनयेआत्मारामाय॥ किंसाधनवशेन॥ नहिमौनशीलिने॥ मौनमात्मारामतातत्स्वभावाय॥ ५०॥ ५।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा०टी०
स्कं० ८
७५

उतः एवावस्थाति स्तायस्थूलस्य स्याएांभातिस्तेनेन नस्कापि भिन्नमानात्येत्यर्थः ॥ किंचनद्रष्टेसर्वोथ्यस्तायसर्व
स्याधिष्टात्रेऽतपतत्प्रविस्वे यास्मिंस्तद्विषयाऽवध्येविस्वायचतद्दिवृत्तोपिष्टानायेत्यर्थः किंचतद्दृष्टुश्च
ध्यासाएवादमात्तिएाश्चपिवास्यविस्वाध्यासस्यतरपवादस्यचविद्याविद्याभ्यांहेतवेसहेतवेविद्यायाश्रयाय
श्चसहेतवेचविद्याश्रय॥ यद्वाप्रविस्वायविस्वुतेनस्याधुवस्याबहितायविस्वायचमाययासांशेः॥ नन्वदवस्या
यतद्दृष्टतासामवस्यानांभावाभावसाक्षिएाश्चन्यत्तमात्मनस्यान्मवेणतिवसर्वोपिष्टातृत्वात्माभिमान
त्वाहि मिर्निरतिशयेश्वर्यायनत्र्यंनमःप्रतिविशेषएोसंकीर्णः पंचपंचाशतानाृत्तः श्रहिस्त्रीभिः प्रसत्त्रोन

पूर्णावस्यातिसायसर्वोथ्यस्तायेतेनमः प्रविस्वायचविस्वायतद्दृष्टस्यचहेतवे ॥५५॥ वंतस्यजन्माथि
तिसंयमाविभग्रुएरनीहोहृतकालशक्तिधृत नन्नन्नभावान्प्रतिवोधयन्ततः समीस्तयामा
त्मविहाराईहसे ॥५६॥ तस्येवतेमूस्तनवः त्रिलोकांशांतानाश्रशांताऽतमूढयोनयः॥ शांताः श्रि
यास्तेलघुनाविलेसतांस्यानस्त्रुतेधर्मपरीप्सयेहतः॥५७॥

स्तासामिवभवेद्विः ॥५८॥ एवंतावद्दृष्टानुमोदनेननमस्कारेणभवंतंप्रासाद्येदानींत्वदधीनानांश्राणि
नांकोपएाथस्याशयवंस्थः प्रार्थयतेनहीतिश्चस्यलोकस्यजन्मादीनत्वमेवाकृतश्चकरोः ततः चेतास्ता
संस्कारहपेणसतः स्वभावान्नोरनादीन्प्रतिवोधयत॥ ईहसेक्रीडसि॥ यद्वाश्रस्यजन्मादीस्वमेवईहसइ
त्यन्वयः कथंभूतः अकृतस्तुनादिः याकालशक्तिः तांधारयतीति तथाश्रन्यत्तमात्मने॥५९॥ अतस्तस्यत
वेदश्वसर्वस्तनवः मंत्यंतइतिक्रीडोपस्काराः तथापितवाधुनाशांताः श्रियाः ऊतः संतापरिपालनेच्छया
ईहतः प्रवर्तमानस्यश्रतः सेनविनुस्यात्ता ह्यनस्य ॥६०॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यदसद्ग्रह इति यतः स्वभावो सद्ग्रहरूपः यद्वा यतः स्वभावादसन्निदेहादौ ग्रहः सद्दुस्त्यज इति म

एवं वनवप्रियावरणाद्यपराधः न हिंसोढव्य इति ॥५१॥ युष्मदनुग्रहे श्रमेयेषां मत्युविदितिके वेत्याहुः ॥५५॥ व
दान्तपाप्राणानोनायामितिभाव ॥५३॥ गुणैर्विविधतया सृज्यते इति विसर्जनं ॥ तत्रापि नानास्वभावादये गुणा २

अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः ॥ क्षन्तुमर्हसि शान्तात्मन्मूढस्य त्वामजानतः ॥५१॥ अनु
गृह्णीष्व भगवन्प्राणांस्त्यजति पन्नगः ॥ स्त्रीणां नः साधुशोच्यानां प ॥ तिः प्राणः प्रदीयतां ॥५२॥
विधेहि ते किंकरीणामनुष्ठेयं तवाज्ञया ॥ यच्छ्रद्धयानुतिष्ठन्वै मुच्यते सर्वतो भयात् ॥५३॥ श्रीशुकः ॥
इत्थं स नागपत्नीभिर्भगवान्समभिष्टुतः ॥ मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः ॥५४॥ प्रति
लब्धेंद्रियप्राणः कालियः शनकैर्हरिं ॥ कृच्छ्रात्समुच्छ्वसन्दीनः सर्पः प्राह कृतांजलिः ॥ काल
यः ॥ वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः ॥ स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः वी
त्वया सृष्टमिदं विश्वं धातर्गुणविसर्जनं ॥ नानास्वभाववीर्यौजोयोनिबीजाशयाकृति ॥५७॥ वयं च तत्र
वसर्वज्ञो जगदीश्वरः ॥ अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः ॥५९॥ श्रीशुकः ॥ इत्याकर्ण्य वचः प्राह
भगवान्कार्यमानुषः ॥ नात्र स्थेयं त्वया सर्प समुद्रं याहि माचिरं ॥ स्वज्ञात्यपत्यदाराढ्यो गोनृभि
र्भुज्यतां नदी ॥ पथिभिर्मुनिभिश्चैव ... तो याहि ममाज्ञया ॥६०॥ भगवन्सर्पा जात्युरुमन्यवः कथं त्यजामस्त्वन्मा
याउस्त्यजां मोहिताः स्वयं ५८ भवान्हि कारणं तत्र न

यमतत ॥५८॥ जात्याजन्मनैव उरुमन्युर्येषां ते स्वयं त्यजामः ॥५७॥ हि यस्मात्तत्र त्वन्मायायामो भवानेव कार
तामित्यनुग्रहं विधेहि वा ममाज्ञया वादं नीतिर्ईश्वर वा निग्रहं वा विधेहि ॥५८॥ यतो गोभिर्नृभिश्च नदी भु
ज्यतामिति ॥५९॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
दशं
१८

नपुष्मतोभयमाप्नुयात ॥ तस्य युष्माभिर्भयं नोत्पादनीयमित्याह ॥ इतोपि द्वयानिर्गतव्यमित्याह ५९
वयत्न स्थितेनत्र संभवतीति भावः ॥ नवनवगरुडाद्भयं भवेदित्याह द्वीपमिति ॥ ६१ ॥ इति श्रीभावार्थदीपिका

यएतत्संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनं ॥ कीर्तयन्नुभयोः संध्योर्नयुष्मद्भयमाप्नुयात ॥ ५९ ॥ यो
स्मिन् स्नात्वा मदाक्रीडे देवादीस्तर्पयेज्जलैः ॥ उपोष्य मत्स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते ॥ ६० ॥ द्वी
पं रमणकं हित्वा ह्रदमेतमुपाश्रितः ॥ यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछितं ॥ श्री शुक उवाच
एवमुक्तो भगवता कृष्णेनाद्भुतकर्मणा ॥ तं पूजयामास मुदा नागपत्न्यश्च सादरं ॥ ६२ ॥ दिव्याम्बरस्र
ङ्मणिभिः परार्ध्यैरपि भूषणैः ॥ दिव्यगंधानुलेपैश्च महत्योत्पलमालया ॥ ६३ ॥ पूजयित्वा जग
न्नाथं प्रसाद्य गरुडध्वजं ॥ ततः प्रीतोभ्यनुज्ञातः परिक्रम्याभिवाद्य तं ॥ ६४ ॥ सकलत्रसुहृत्पुत्रो
द्वीपमब्धेर्जगाम ह ॥ तदैव सामृतजला यमुना निर्विषाभवत ॥ ६५ ॥ अनुग्रहाद्भगवतः क्रीडा
मानुषरूपिणः ॥ गावः सर्वे परिस्रुत्य मृतं पुनरिवागताः ॥ ६६ ॥ गोपा मूर्छाभिहार्देन सिषिचु
र्नेत्रजैर्जलैः ॥ कृष्णमक्लिष्टकर्माणं मन्वाविस्मितचेतसः ॥ ६७ ॥ नद्यः समुदिता गोपा ह्लादि
वर्ज्जलो नदी ॥ ६८ ॥ गीयमानः सगोपीभिश्चरितैश्चारुविक्रमः ॥ संस्तूयमानो गोपैश्च कृष्णो
व्रजमुपागतः ॥ ६९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे षोडशोध्यायः ॥ १६ ॥

यां दशमस्कंधे षोडशोध्यायः ॥ १६ ॥ नागं सप्रदशेनागालयं तं निरयापयत ॥ वंधूनृद्धः स्वतः श्रोतान्स

१८

असमंजसमप्रियं ॥ उपाहार्यैः सुपर्णाभक्ष्यैः सर्पजनैः सर्पा एव जनाः तैः नागानां संबंधी यस्मि
न्नेके को नागो दीयते तया भूतो यो बलिः सुपर्णाय निरूपितः वानस्पत्यः वनस्पतेर्मूले देयः नागा
नां तद्वध परिहाराय यो बलिः उपकल्पितः ॥२॥ तं च नागाः स्वं स्वं भागं सुपर्णाय प्रयच्छंति ननु
भीताः गोपीथाय रक्षणाय ॥३॥ विषवीर्यमदाविष्टः तेनाविष्टः काद्रवेयः कद्रूपुत्रः गरुडं कद
र्थीकृत्य विगणय्य यद्वा उपहार्यैः सुपर्णाभक्ष्यैः सर्पा एव जनाः तैर्नागानां संबंधी यस्मिन्नेके को

गरुडाय च ॥ नागालयं रमणकं कस्मात्तत्याज कालियः ॥ किं वा कृतं सुपर्णस्य तेनैकेनासमंज
सं ॥१॥ श्रीशुकः ॥ उपहार्यैः सर्पजनैर्मासि मासीह यो बलिः ॥ वानस्पत्यो महाबाहो नागा
नां प्राङ्निरूपितः ॥२॥ स्वं स्वं भागं प्रयच्छंति नागाः पर्वणि पर्वणि ॥ गोपीथायात्मनः सर्वे सु
पर्णाय महात्मने ॥३॥ विषवीर्यमदाविष्टः काद्रवेयस्तु कालियः ॥ कदर्थीकृत्य गरुडं स्व
यं तं बुभुजे बलिं ॥४॥ तच्छ्रुत्वा कुपितो राजन् भगवान् भगवत्प्रियः ॥ विजिघांसुर्महावेगः
कालियं समुपाद्रवत् ॥५॥ तमापतंतं तरसा विषायुधः प्रत्यभ्ययादुत्थितनैकमस्त
कः ॥ दद्भिः सुपर्णं व्यदशद्ददायुधः करालजिह्वोछुसितोग्रलोचनः ॥६॥

नागो दीयते ॥ तया भूतो यो बलिः सुपर्णाय निरूपितः ॥ तत्र स्वं स्वं भागं सर्वे नागाः प्रयच्छंति का
लिय एकस्तु न प्रयच्छति ॥ किं तु अन्यैर्दत्तमपि बलिं स्वयमेव बुभुजे ॥४॥ विषमेवायुधं यस्य सः प्रत्यभ्य
यात ॥ योद्धुं प्रतिजगाम उत्थितानेकमस्तकः ॥ उन्नमिताने कफणाः दद्भिः दंष्ट्रायुधः दंतायुधः करालजि
ह्वः भीषणोच्छुसितोग्रलोचनः उच्छुसितानि उन्नमितानि उग्राणि

श्रीभागवतटीका दशमस्कं ४७ ॥

श्री
भा दु
पु टी

तार्क्ष्यपुत्रोगरुडः मधुसूदनस्यासनंयासिनूसः ॥ ७ ॥ तस्यागरुडस्यागमं श्रुत्वाधनयाद्भ्रामह्रे ॥ ८ ॥ नदीम
लेकाश्रणामाहृतेचेनिनिवारितोपि ॥ १० ॥ लेलिह्यः सर्पतत्रावात्सीत ॥ ११ ॥ जांबूनदेसुवर्णेतेनालंकृते ॥ १२ ॥

तेनार्दपत्रः मनिमस्यमनुमान्नुवृंदेवेगोमधुसूदनासनः ॥ फणेणसबोनहिरण्यरोविषाभ्या
नकद्रूस्वनगुग्रविक्रमः ॥ ७ ॥ सुपर्णपक्षाभिहतः कालियोनीवविह्वलः ह्रदंविवेशकालिंद्याः
तदगम्यंदुरासदं ॥ ८ ॥ तत्रैकदाजलचरंगरुडोभक्ष्यमीप्सितं ॥ निवारितः सौभरिणा प्रसह्यक्षुधि
तोहरत् ॥ ९ ॥ मीनान्सुदुःखितान्दृष्ट्वादीनान्मीनपतौहते ॥ कृपयासौभरिः प्राहतत्रत्यक्षेमम्
चरन् ॥ १० ॥ अत्रप्रविश्यगरुडोयदिमत्स्यान्सखादति ॥ सद्यः प्राणैर्वियुज्येतसत्यमेतद्ब्रवीम्यहं
॥ ११ ॥ तत्कालियः परंवेदनान्यः कश्चनलेलिहः ॥ अवात्सीद्गरुडाद्भीतः कृष्णेनचविवासितः ॥ १
१२ ॥ कृष्णंह्रदाद्विनिष्क्रांतंदिव्यस्रग्गंधवाससं ॥ महामणिगणाकीर्णंजांबूनदपरिष्कृतं ॥ १३ ॥ उ
पलभ्योत्थिताः सर्वेलब्धप्राणाइवासवः ॥ प्रमोदनिभृतात्मानोगोपाः प्रीत्याभिरेभिरे ॥ १४ ॥ यशो
दारोहिणीनंदोगोप्योगोपाश्चकौरव ॥ कृष्णंसमेत्यलब्धेहाआसन्लब्धमनोरथाः ॥ १५ ॥

प्रसवः प्राणेंद्रियाणि ॥ प्रमोदनिभृतात्मनः ॥ कृष्णंदर्शनमनसः ॥ १४ ॥ लब्धेहाः लब्धचेष्टाः ॥ १५ ॥ ॥

६६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न । गावृत्ताश्चपितरोवैभ्युक्ताःसंतमसाःपरिविह्वलास्तथा ॥१८॥ नष्टलब्धप्रजानामप्यायापुनर्लब्धाःप्रजा।
ययामा ॥१९॥ श्रमेणाकर्षितास्तउपकूलतःकूलप्रांते ॥२०॥ कालाग्नेर्मृत्युरूपादग्नेःनमस्तेर्विभो मःकिंत।

रामश्चाच्युतमालिंग्यजहासास्यानुभाववित॥ प्रेम्णातमंकमारोप्यपुनःपुनरुदैक्षत॥१६॥ नगा
गावोवृषावत्सतर्योलेभिरेपरमांमुदं॥१७॥ नंदंविप्राःसमागत्यगुरवःसकलत्रकाः॥ ऊचुस्तेकालि
यग्रस्तोदिष्ट्यामुक्तःतवात्मजः॥१७॥ देहिदानंद्विजातीनांकृष्णनिर्मुक्तिहेतवे॥ नंदःप्रीतमना
राजन्गाःसुवर्णंतदादिशत्॥१८॥ यशोदापिमहाभागानष्टलब्धप्रजासती॥ परिष्वज्यांकमा
रोप्यमुमोचाश्रुकलांमुहुः॥१९॥ तांरात्रिंतत्रराजेंद्रक्षुत्तृड्भ्यांश्रमकर्षिताः॥ ऊषुर्व्रजौकसो
गावःकालिंद्याउपकूलतः॥२०॥ तदाशुचिवनोद्भूतोदावाग्निःसर्वतोव्रजं॥ सुप्तंनिशीथआ
वृत्यप्रदग्धुमुपचक्रमे॥२१॥ ततउत्थायसंभ्रांतादह्यमानाव्रजौकसः॥ कृष्णंययुस्तेशरणं
मायामनुजमीश्वरं॥२२॥ कृष्णकृष्णमहाभागहेरामामितविक्रम॥ एषघोरतमोवह्निःताव
कान्ग्रसतेहिनः॥२३॥ सुदुस्तरान्नःस्वान्पाहिकालाग्नेःसुहृदःप्रभो॥ नशक्नुमःत्वच्चरणं
संत्यक्तुमकुतोभयं॥२४॥ इत्थंस्वजनवैक्लव्यंनिरीक्ष्यजगदीश्वरः॥ तमग्निमपिबत्तीव्रम
नंतोनंतशक्तिधृक्॥२५॥

नत्वच्चरणंवियोगादित्याहुःनशक्नुमइति॥ विमोहनंहितंतेनततःस्वशरणंगतान्॥ गोपान्पाद

श्रीमद्भागवतेदशमस्कंधे ॥१८॥

श्री भाग द॰टी १८

इति श्रीभावार्थदीपिकायां दशमस्कंधे सप्तदशोऽध्यायः ॥१७॥ अष्टादशे ततो ग्रीष्मे वसंतगुणलक्षिते
प्रवालपट्टलेनालं प्रलंबं लीलयाहरत् ॥ कृष्णवान्नृत्यफणाग्रेषु कालियस्य सकौतुके ॥ बले प्रलंबवेगानस
मारोहयत्तदातिष्ठा ॥१॥ गोपालकच्छमायया गोपालनमेव कच्छ यस्यात्तथा ॥२॥ वसंतसाम्यमाह वननिर्भिः
३॥ यत्र ग्रीष्मेपि निर्झराणां निर्ह्रादैन चौषगतानि हृन्नस्वनाः कन्नधनयो झिल्लिकाः कठोरध्वनयः स्व

इति श्रीभागवते दशमस्कंधे सप्तदशोऽध्यायः ॥१७॥ श्रीशुक॰ अथ कृष्णः परिवृतो ज्ञातिभिर्मु
दितात्मभिः ॥ अनुगीयमानो न्यविशद्व्रजं गोकुलमंडितं ॥१॥ व्रजे विक्रीडतोरेवं गोपालकच्छ
मायया ॥ ग्रीष्मो नामर्तुरभवन्नातिप्रेयान्शरीरिणां ॥२॥ स च वृंदावनगुणैर्वसंत इव ल
क्षितः ॥ यत्रास्ते भगवान्साक्षाद्रामेण सह केशवः ॥३॥ यत्र निर्झरनिर्ह्रादनिवृत्तस्वनझि
ल्लिकं ॥ शश्वत्तच्छीकरर्जीषद्रुममंडलमंडितं ॥४॥ सरित्सरःप्रस्रवणोर्मिवायुना कह्लारकं
जोत्पलरेणुहारिणा ॥ न विद्यते यत्र वनौकसां दवो निदाघवह्न्यर्कभवोतिशाद्वले ॥५॥

ल्लकीरुका यस्मिन् स्वनेति पाठे स्वरो गंधर्वजाति प्रभृति कोशे स्वनानां गंधर्वाणां झिल्लिकाः कठो
रध्वनिः ॥ तथाभूतं वृंदावनं भवति किं च शश्वत्तेषां निर्झराणां शीकरैः ऋजीषकर्णैः ऋजीषाः स्नि
ग्धाः ये द्रुमाः तेषां मंडलैर्मंडितं ॥४॥ यत्र ग्रीष्मवने वा निदाघो ग्रीष्मः तेन तत्काले न वह्न्यर्काभ्यां च
भवति यो दवः तापः अतिशाद्वले ॥ अतिहरिततृणाकीर्णे यद्वा अतिक्रांतशाद्वलेपि स्थाने ॥५॥

१८

ह

नेनु पाद्व लमेव कृतस्यं तन्नाहस्रं गायेति ॥ अगानितो या वियामोतेत्तमोह्व दिनीनोनटस्पर्धिभिर
र्मिभिः पुलिने द्रवत्पुरीषं पंकोयस्याः तस्याधुवो संघाह्व लिने शाढलस्पलाववि षवङ्कलागोप्र
पिस्तूर्यं रपमयः नगृह्वनेहरेति ॥ ५ ॥ तहनेनदंतैः विज्ञामृगाह्विनास्त्रयस्मिन्नगायेनेसमूराभ्रमराश्च

अगात्यतोयहृदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिने समंततः ॥ नयत्र चेडंगकराविषोह्वगा
धुवोसमघाट्ठलिने च शृह्वने ६ ॥ वनेकृतसमिते श्रीमुकुंदहरिस्वाद्विजे ॥ गायन्मयूरभ्रमरं कूजत्को
किलसारसं ॥ ७ ॥ क्रीडिष्यमाणास्तत्कृष्णो भगवान्बलसंयुतः ॥ वेणुं विरणयन्गोपैर्गोधनैः सं
वृतोविशन् ॥ ८ ॥ प्रवालबर्हस्तवकस्रग्धातुकृतभूषणाः ॥ रामकृष्णादयो गोपा ननृतुर्युयुधुर्ज
गुः ॥ ९ ॥ कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् ॥ वेणुपाणितलैः शृंगैः प्रशशंसुर
थापरे ॥ १० ॥ गोपजातिप्रतिछन्ना देवा गोपालरूपिणः ॥ ईडिरे कृष्णरामौ च नटा इव नटं नृप
भ्रामणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः ॥ चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित् ॥ १२ ॥
क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ क्वचित् ॥ शशंसतुर्महाराज साधु साध्विति वादि
नौ ॥ १३ ॥ क्वचिद्बिल्वैः क्वचित्कुंभैः क्वचामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृग
खगेहया ॥ १४ ॥

यस्मिन्नकूजंतः कोकिलाः सारसाश्च यस्मिंस्तत्र प्रविशन् ॥ ७ ॥ काकपक्षाः चूडाकरणाख्यकन
केशाः भ्रमणादिषु काष्ठैः नियुद्धेन बाहुयुद्धेन वा विक्रीडतुः ॥ १२ ॥ बिल्वैः बिल्वफलैः अस्पृश्यानं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० द० ७५

ऊडेडवप्लावैः मर्कटकल्पनाभिः स्पंदोलिकया दोलालंबनेन नृपाणामिव लीलया ॥१५॥ नद्यः अद्रिद्रोण्यः पर्व
तदर्यः कुंजा निवलनादिविहितस्थानानि कुंजेषु काननेनेषु सरस्सु च ॥१६॥ पशूंश्चारयतोः सतोः ॥ तद्वने त

क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः ॥ कदाचित्स्पंदोलिकया कर्हिचिन्नृपलीलया ॥१५॥ एवं तौ
लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने ॥ नद्यद्रिद्रोणिकुंजेषु काननेनेषु सरस्सु च ॥१६॥ पशूंश्चारयतोर्गो
पैस्तद्वने रामकृष्णयोः गोपरूपी प्रलंबोगादसुरस्तज्जिहीर्षया ॥१७॥ तं विद्वानपि दाशार्हो भगवा
न्सर्वदर्शनः अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन् ॥१८॥ तत्रोपाहूय गोपालान्कृष्णः प्राह विहार
वित् हे गोपा विहरिष्यामो द्वंद्वीभूय यथायथं ॥१९॥ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ ॥
कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे ॥२०॥ आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ॥ तत्रा
रोहंति जेतारो वहंति च पराजिताः ॥२१॥ वहंतो वाह्यमानाश्च चारयंतश्च गोधनं ॥ भांडीरकं नाम वटं जग्मुः कृष्ण
पुरोगमाः ॥२२॥ रामसंघट्टिनो यर्हि श्रीदामवृषभादयः क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो
नृप ॥२३॥ उवाह कृष्णो भगवान्श्रीदामानं पराजितः ॥ वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतम्
॥२४॥

जेतारो वहंति २

स्मिन्वने ननयोर्जिहीर्षया हंतुमिच्छया ॥१७॥ यथायथं वयोबलाद्यानुरूपं द्वंद्वीभूय ॥१९॥ परिवृढौ ना
यकौ तत्र केचन श्रीकृष्णस्य संघट्टिनः कृष्णपक्षीयाः ॥२०॥ वाह्यमानाः पृष्ठेनोह्यमानाः ॥ २२ ॥

७५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कृमारुहितंत्र नायश्रव न्कृत्वनेत्रस्मिन्निति प्रवरोहणमयोर्द्ततः परं हरमगात् ॥ २५ ॥ धराणि धरेंद्र व
द्वोर वंशस्यांते निजमास्यरंवपुरास्थितः ॥ पुरःस्थरितकेटः सर्वर्णालंकारः ॥ तडिंद्युमान् विद्युद्दीप्तिमान्
इत्यलंकारोपमा उद्दृपतिवाडितिरामोपमाउद्दृपतिनाराणोपनिंवहतीति उद्दृपतिवाट् ॥ यदिपयो
वितरणाले पुरःस्थितानाविद्युतोभवंति ॥ उपविवोद्दुपतिस्तदा संसोद्बुद्धो यथा भवति ॥ नवतत्व भाविनयर्थः
२८ ॥ स्वलमति वेगेन प्रदीप्तदंष्ट्रोपसिंस्तत ॥ भृकुटितटसंलग्ना उग्रा दंष्ट्रा यस्मिंस्तत ॥ प्रदीप्तमटकु

अविषह्यं मन्यमानो रामं दानवपुंगवः ॥ वहन्नूरतनं भागादवरोहणतः परं ॥ २५ ॥ नमुद्वहन्धरा
धराधरेंद्र गौरवंश महास्यो विगतरजोतिनंवपुः समास्थितः पुरःस्थरितकृदोवभौ तडिंद्युमानुडु।
पतिवाडिंवोद्बुदः ॥ २६ ॥ निरीक्ष्य नदपुरलंमव रेचरम्बदीप्तटम्भुकुटीतटोग्रदंष्ट्रकं ॥ ज्वलति
दृष्टकरकाकिरीटकुंडलं विषाद् नेहलधरंरेषरवमस्त ॥ २७ ॥ स्वयागतस्मृति रभयोरिपु
वलोविहायसाध्व मिवहरंतमात्मनः ॥ कृपाहनाक्रिरमिटदेन खुष्टिना स्वर्गाधिपोगिरि।
रिमिव वज्ररंहसा ॥ २८ ॥ स्विनज्वलंतः पिंगलाः केशाः यस्मिं
भृकुटितटंयस्मिन् ॥ उग्रादंष्ट्राखुप
स्तत ॥ २७ ॥ आगता स्मृतिर्ज्ञानं यस्य सः ॥ अतपवाभयः आत्मनः साध्यंगोपसमहं विहायहरंतं रिपुमहन
तत्त्वान ॥ यद्वविहायसा आकाशमार्गेण आत्मनः साध्वमथ्यमिवहरंतमिति ॥ वज्रोरंहसा वज्रवेगे
न मुष्टिर्नतस्य प्रलंवस्य मस्तके मुष्टिहननेन नजीवितं त्ययरन्यागतस्मृतिः आभनस्तानोवा ॥ २८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा द स्कं १८

कोपयमः ॥ गणांसावर्तकेनाम मेघानांचांतकारिणां ॥ इंद्रः प्रचोदयत्क्रुद्धो वाक्यं चाहेशमा ॥ १ ॥
नुत ॥ १ ॥ अहो श्रीमदमाहात्म्यं गोपानां काननौकसां ॥ कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेल
नं ॥ २ ॥ क्रियाटठैः कर्ममयैः क्रतुभिर्नामनौनिभैः ॥ विद्यामान्वीक्षिकीं हित्वा तितीर्षंति
भवार्णवं ॥ ३ ॥ वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनं ॥ कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रि

नामनावेतायानौरितितयवद्रिपतेननसटयोः आन्वीक्षिकीमा
क्रियानिर्वृत्तैः ॥ अतएवनामनौनिभैः [illegible] बालिशपापिष्ठ अतएव [illegible] पंडितमानिनं पंडितंमन्यं स्वतः
स्मादनुस्तत्रह्मणां ॥ ४ ॥ तथा वाचालं बहुभाषिणं बालिशंपापिष्ठं प्रज्ञंमूर्खं पंडितमानिनं पंडितंमन्यं स्वतः
स्तब्धमविनीतमतितिरोयायोनिनापीदृश्यभारती श्रीकृष्णस्तोनितनयाहित्वा बालेशुमस्यानिवालि
तामेवद्विषस्तुवज्ञिश्चभिमानं स्तब्धमयस्यस्तब्धस्यभावादतमं ॥ अज्ञंनास्तिन्यायस्मात्सर्वज्ञमित्यर्थः
पंडितमानिनंबालिशंबहुमाननीयंकृष्णं संप्रदानं दर्पपरब्रह्मसमर्थंतथापिभक्तवात्सल्येनमनुष्य

॥ २ ॥

॥ ७ ॥

द०प०टी० स्कं०१० अ०२५

सवलिमानोऽस्माध्यायिनात्मनोहं हिनेदेहानां धुनतश्रुणनयतश्रीमदेनयः स्तंभोगर्व स्तं ॥५॥ विभ्र
तस्मान्मेया स्वत्याह स्वहं वेति श्रनु ब्रजेश्रनंतरमेवागमिष्यामि मरुद्गौर्देवगोणः सह ॥६॥ सबवनादे
द्गणनिर्मुक्तो बंधनेयेषां तेषलयामि प्रायेणवदाश्राममतनदानिमुक्तबंधनाः सेतः श्रासारैः धारासंपा

त्यशंत्रियावलिप्रानोक्तसेनाऽध्यायिनात्मनो ॥ धुनतश्रीमदस्तंभंपष्टश्नयनसंदायं ॥९॥
अहर्वेरावतेनागमानस्यानुब्रजेब्रजं ॥ मरुद्गणैर्महावीर्यैर्नंदगोकुलजिघांसया ॥१०॥ श्रीशु
कः ॥ इत्यमघवताज्ञप्तो मेघानिर्मुक्तबंधनाः ॥ नंदगोकुलमासारैः पीडयामासुरोजसा ॥११॥
विद्योतमाना विद्युद्भिर्नदंतः स्तनयित्नुभिः ॥ तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ॥१२॥
स्थूणास्थूला वर्षधारामुंचत्स्वभ्रेष्वभीक्ष्णशः ॥ जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतं ॥१३॥ नाभू
अत्यासारातिवातेन पशवो जातवेपनाः ॥ गोपा गोप्यश्च शीतार्ता गोविंदं शरणं ययुः ॥१४॥
शिरः सुतांश्च कायेन प्रच्छाद्यासारपीडिताः ॥ वेपमाना भगवतः पादमूलमुपाययुः ॥१५॥

तैः गोकुलं पीडयामासुः ॥८॥ स्तनयित्नुभिः शब्दानिर्नदंतः गर्जन्तः मरुद्गणैः आवहप्रवाहादिवायुसमूहैः
नुन्नाः प्रेरिताः जलशर्कराः जलोपलान् ॥९॥ स्थूणावत्स्थूलाः अभ्रेषु मुंचत्सु भ्रमनु तनोन्नतं नतं निम्न
उन्नतं तद्विपरीतं यथा भवति तथा भूर्नादृश्यत ॥ जातवेपना जातकंपाः ॥११॥ नत्रपमूलं पादं विधि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गोपगोपीनां प्रार्थनामाह ॥ त्वमेव नाथो योऽस्य त्वद्धो कुलं गवां कुलं वं शरणं नः ॥ अस्माकं देवादिंद्रात्त्रातुं रदि
तुमर्हसि ॥१३॥ विज्ञापनात्पूर्वमेव कुपितेनेंद्रेणाकृतं तत्तद्धं रामेने कृष्णमेनेनदाह ॥१४॥ अपगतऋतुर्यस्य
तदृर्तं अतिशायितो वातो यस्मिंस्तत् ॥ अतिवाते शिलामयं शिलाप्रचुरं ॥१५॥ तत्र प्रतिज्ञापूर्वं गोव
र्धनोद्धरणमाह ॥१५॥ प्रतिविधिं प्रतीकारं स्वसामर्थ्येन साधयिष्यामि तेन च मौढ्याल्लोकेशमानि

कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो ॥ त्रातुमर्हसि देवान्नः कुपिताद्भक्तवत्सल ॥१३॥ शिला
वर्षातिवातेन हन्यमानमचेतनं ॥ निरीक्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः ॥१४॥ अपर्त्वत्युल्ब
णं वर्षमतिवातं शिलामयं ॥ स्वयागे निहते स्माभिरिंद्रो नाशाय वर्षति ॥१५॥ तत्र प्रतिवि
धिं सम्यगात्मयोगेन साधये ॥ लोकेशमानिनां मौढ्याद्धरिष्ये श्रीमदं तमः ॥१६॥ न हि सद्भावयु
क्तानां सुराणामीशविस्मयः ॥ मत्तोऽसतां मानभंगः प्रशमायोपकल्पते ॥१७॥ तस्मान्मच्छर
णं गोष्ठं मन्नाथं मत्परिग्रहं ॥ गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥१८॥ इत्युक्त्वैकेन ह
स्तेन कृत्वा गोवर्धनाचलं ॥ दधार लीलया कृष्णश्छत्राकमिव बालकः ॥१९॥ ॥ व १

वदकाछत्रकं तत्तेषां तमः तदाह नहीति सद्भावः सत्त्वं सद्भिर्युक्तानां सुराणां ईशावयमिति
विस्मयो गर्वो हि यस्मात्तद्व वर्तते ॥ असत्सु मत्तः तेनैकिंच नेषां मानभंगः प्रशुपहपेत्याह मन्न इति ॥१७॥ गो
पायेद्रक्षिष्यामि किंच सोऽयं मम यावृतो नियमः ॥ संकल्पो वा आहितः धृत इत्यर्थः ॥१८॥ कृष्णः ॥

नौश्रीमद्वल्लभाचार्यांत
मोहरिष्यामिवद्दुव
चनेन तव कृपाक्षीन
स्थिप्रेमि १६ नेतुदे
वाः सात्विकाः
८॥

॥ [illegible] ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० द० टी० ९५

यथोपजोषं यथासुखं सव्रजाः शकटमंडलीसहिताः ॥२०॥ सोपजीविनः भृत्यपुरोहितादिसहिताः यथावा
काशमसंकोचेनस्थिताः ॥२२॥ पदात्स्थानात्सप्तदिनानियावत् ॥२३॥ व्युदप्रायाः विगतोदकप्रायाः स्वल्पजा

त्रि २

अथाह भगवान्गोपान्हेंब तात व्रजौकसः यथोपजोषं विशत गिरिगर्तं सगोधनाः ॥२०॥ न त्रास इह
वः कार्यो मद्धस्ताद्रिनिपातने ॥ वातवर्षभयेनालं तत्त्राणं विहितं हि वः ॥२१॥ तथा निर्विविशुर्गर्तं कृ
ष्णाश्वासितमानसः ॥ यथावकाशं सधनाः सव्रजाः सोपजीविनः ॥२२॥ क्षुत्तृड्व्यथां सुखापेक्षां हित्वा
तैर्व्रजवासिभिः ॥ वीक्ष्यमाणो दधाराद्रिं सप्ताहं नाचलत्पदात् ॥२३॥ कृष्णयोगानुभावं तं निशम्ये
२५ न्द्रोतिविस्मितः ॥ निःस्तंभो भ्रष्टसंकल्पः स्वान्मेघान्संन्यवारयत् ॥२४॥ खं व्यभ्रमुदितादित्यं वातव
२६ र्षं च दारुणं ॥ निशम्योपरतं गोपान्गोवर्धनधरोऽब्रवीत् ॥२५॥ निर्यात त्यजत त्रासं गोपाः सस्त्रीध
नार्भकाः ॥ उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः ॥२६॥ ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनं ॥
शकटोढोपकरणं स्त्रीबालस्थविराः शनैः ॥२७॥ भगवानपि तं शैलं स्वस्थाने पूर्ववत्प्रभुः पश्य
तां सर्वभूतानां स्थापयामास लीलया ॥२८॥ ॥ ॥ यर

ला निम्नगा नद्यः ॥२६॥ शकटोढोपकरणं शकटन्यस्तं उपकरणं भांडादिकं यथा भवति तथा गोधनमादाय श
नैर्निर्ययुः ॥२७॥ २८ ॥

९५

निभृताः स्थिता यथायथं योचितं परिरंभणादिभिः समीयुः युयुजुः सदाशिषः प्रेम्णा आशीर्वादा
न् ॥२९॥ ततो गोवर्धनोत्थापनानंतरं ॥ अस्य श्रीकृष्णस्य तथाविधानि गोवर्धनोद्धरणादीनि कृतानि
कर्माणि गायंत्यः ईयुर्ययुः कथंभूताः प्रेम्णा हृदिस्पृशः सानुरागाः यद्वा ॥ कथंभूतस्य प्रेष्ठेनेन नासौह

तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरंभणादिभिः ॥ गोप्यश्च सस्नेहमपूजय
न्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः ॥२९॥ यशोदा रोहिणी नंदो रामश्च बलिनां वरः ॥ कृ
ष्णमालिंग्य युयुजुराशिषः स्नेहकातराः ॥३०॥ दिवि देवगणाः साध्याः सिद्धगंधर्वचारणाः
तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि पार्थिव ॥३१॥ शंखदुंदुभयो नेदुर्दिवि देवप्रणोदिताः
जगुर्गंधर्वपतयस्तुंबुरुप्रमुखा नृप ॥३२॥ ततोनुरक्तैः पशुपैः परिश्रितो राजन्स्वगोष्ठं सबलो
व्रजद्धरिः ॥ तथाविधान्यस्य कृतानि गोपिका गायंत्य ईयुर्मुदिता हृदिस्पृशः ॥३३॥ इति श्रीभा
गवते दशमस्कंधे पंचविंशोध्यायः ॥२५॥ श्रीकृष्णः ॥ एवंविधानि कर्माणि गोपाः कृष्ण
स्य वीक्ष्य ते अतद्वीर्यविदः प्रोचुः समभ्येत्य सुविस्मिताः ॥१॥

दिस्पृशा तीति हृदिस्पृक्तेनस्य ॥३३॥ इति श्रीभावार्थदीपिकायां दशमस्कंधे पंचविंशतितमोध्यायः ॥२५॥ ब
हिरंगो विस्मिता गोपा नंदकृष्णस्याद्भुतकर्मभिः ॥ नंदो गर्गोक्तिमाश्राव्य तद्देश्वर्यमवारयत् ॥ समभे
त्य नंदमभिगम्य ॥ यद्द्रवुः तदाह बालकस्येति ॥१॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हरिः

श्री भाग० पु० टी० १०

यद्यस्मात्तव बालकस्य कृष्णस्याद्भुतानि कर्माणि तस्माद्ग्रामेषु गोपेषु कथं जन्मार्हति ग्राम्यत्वगुप्ति
तं ग्राम्यानद्भुतानि कर्माण्याह द्वाभ्यां ॥ दशभिः यः सप्तहायन इति ॥ १ ॥ सप्तहायनः सप्तवार्षिकः कथं वि
भर्त्ति अनत्यनरति पुष्करं पद्मं गजराट् महागजेन्द्र इव ॥ २ ॥ महौजसो महाबलायाः ततो र्वयः आयुर्यौवनं का

गोपा ऊचुः ॥ बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वै ॥ कथमर्हत्यसौ जन्म ग्रामेष्वात्मजुगु
प्सितं ॥ १ ॥ यः सप्तहायनो बालः करेणैकेन लीलया ॥ कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव ॥ २ ॥ तो
केनामीलिताक्षेण पूतनाया महौजसः ॥ पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः ॥ ३ ॥ हिन्वतो
ऽधः शयानस्य मास्यस्य चरणावुदक् ॥ अनोऽपतद्विपर्यस्तं रुदतः प्रपदाहतं ॥ ४ ॥ एकहायन आ
सीनो ह्रियमाणो विहायसा ॥ दैत्येन यस्तृणावर्तमहन् कण्ठग्रहातुरं ॥ ५ ॥ क्वचिद्धैयंगवस्तैन्ये मात्रा
बद्ध उदूखले ॥ गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ॥ ६ ॥ वने संचारयन्वत्सान् सरामो बा
लकैर्वृतः ॥ हन्तुकामं बकं दोर्भ्यां मुखतोऽरिमपाटयत् ॥ ७ ॥ वत्सेषु वत्सरूपेण प्रविशन्तं जिघां
सया ॥ हत्वान्यपातयत्तेन कपित्थानि च लीलया ॥ ८ ॥ हत्वा रासभदैतेयं तद्बन्धूंश्च बलान्वितः
चक्रे तालवनं क्षेमं परिपक्वफलान्वितं ॥ ९ ॥

तेन यथा पीयते ॥ ४ ॥ अधः शयान
स्य मासाः त्रयः परिक्षेय
स्य ॥ उदक् ऊर्ध्वं चरणौ हिन्वतः चालयतः प्रपदेन पादाग्रेणाहतं विपर्यस्तं विपरीतं अनः कथमपतत् ॥ ५ ॥ यो
दैत्येन ह्रियमाणः सन् तं तृणावर्तं दैत्यं कथमहन् इत्यर्थः ॥ ६ ॥ हैयंगवस्तैन्ये नवनीतचौर्ये
बाहुभ्यां गच्छन्नरिवत्रिन्यर्थः ॥ ७ ॥ हन्तुकामो यस्तं वकं वेगमरिं बाहुभ्यां मुखतः कथमपाटयत्

अ० २ ८ १०

आशीविषतमो ऽशतिक्रूरविष आसो अहीदं आशीविषतमाहीद्वलम् ॥ आत्यंतिकः स्वाभावि-
कः कथमिति किं सर्वेषामात्मत्वादिति शंका ॥ उक्रमप्याति विस्मयेनाभिनयेन वदतीति कृष्णमहापयन इति १२

प्रलंबे ब्रातयितानाशु बलेन बलशालिना ॥ अमोचयद्व्रजपशून् गोपांश्चारण्यवह्नितः ॥११॥ आशीविष-
तमाहींद्रं दमित्वा विमदं ह्रदात् ॥ प्रसह्योद्वास्य यमुनां चक्रेसौ निर्विषोदकां ॥१२॥ दुस्त्यजश्चानुरागो- ए
स्मिन् सर्वेषां नो व्रजौकसां ॥ नंद ते तनयेस्मासु तस्याप्यौत्पत्तिकः कथं ॥१३॥ क्व सप्तहायनो बालः
क्व महाद्रिविधारणं ॥ ततो नो जायते शंका व्रजनाथ तवार्भके ॥१४॥ नंद उवाच ॥ श्रूयतां मे वचो
गोपा व्येतु शंका च वोर्भके ॥ एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥१५॥ वर्णास्त्रयः किला-
स्यासन् गृह्णतोनुयुगं तनूः ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥१६॥ प्रागयं वसुदेवस्य
क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥१७॥ बहूनि संति नामानि रूपाणि
च सुतस्य ते ॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ ॥१८॥

नंदस्य श्री जातं
प्राक् कृतत्वमेव गर्गाचार्यवाक्यं ॥ तत्र वितपादिशीलनेन निर्देशं संभावनस्य हेतुत्वाव्यग्रानकैः सह इदानीं
तेनैव वाक्येन गोपानुपदिशति ॥ श्रूयतामिति ॥१८॥ ॥ ॥ ॥ ॥

एष वः श्रेय आधास्यद्गोपगोकुलनंदनः १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा. द. टी. १०१

तस्मात्तस्य कर्मस्वविस्मयो नास्तीति वदंत्योक्तिः ॥ २१ ॥ २२ ॥ इत्यर्द्धमात्रा त्वांशतिसमादिश्य गर्गो स्वा
गृहं गते मतितदानीमन्यमानोपि ॥ इदानीं कृत्स्नेनारायणस्यांशमेव मन्ये ॥ अद्रेहनः अक्लिष्टकारिणमिति ॥ २३
गोवर्द्धनोद्धरणं सपरिकरमनुस्मरन् प्रकटितैश्वर्यस्य प्रीतिं प्रार्थयते देव इति ॥ २४ ॥ यत्तावित्वेन यास्तु
तयादेवे इंद्रे वर्षति सति ॥ वज्राश्मवर्षानिलैः अशनिजलशर्करानीलवायुभिः ॥ सीदत्याः अल्पपशुस्त्रियः सीद
भुगोतेन व्रजपतेस्माथ वोदस्युपीडितात् ॥ अ राजकेव त्वाम् आणाञ्जिग्युर्दस्यूनसमेधितात् ॥ २१ ॥ यएत
स्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः ॥ २२ ॥ तस्मा
न्नंदात्मजोयं ते नारायणसमो गुणैः ॥ श्रियाकीर्त्यानुभावेन तत्कर्मसु न विस्मयः ॥ २३ ॥ इत्यद्धामां
समादिश्य गर्गे च स्वगृहं गते ॥ मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणम् ॥ २४ ॥ इति नंदवचः
श्रुत्वा गर्गगीतं व्रजौकसः ॥ दृष्टश्रुतानुभावास्य कृष्णस्यामिततेजसः ॥ २५ ॥ मुदिता नंदमानर्चुः
कृष्णं च गतविस्मयाः ॥ २५ ॥ देवे वर्षति यज्ञविप्लवरुषा वज्राश्मवर्षानिलैः ॥ सीदत्पालपशुस्त्रि
यात्मशरणं दृष्ट्वानुकंप्युत्स्मयन् ॥ उत्पाट्यैककरेण शैलमबलो लीलोच्छिलींध्रं यथा ॥ बिभ्रद्गो
तं पालाः पशवः स्त्रियश्च यस्मिंस्तत् ॥ तथा आत्मा स्वयमेव शरणं यस्य तत्कृपां दृष्ट्वा ॥ अनुकंपी दयावा
न् उत्स्मयन् प्रहसन् ॥ नातिकृच्छ्रेणैव शैलमुत्पाट्य ॥ अबलो बालो लीलया उच्छिलींध्रं यथा ॥ एकेन क
रेण बिभ्रद्गोष्ठमपात् अपालयत् ॥ एवं महेंद्रमदभित् ॥ गवामिंद्र इत्यन्वर्थाख्याया श्रीस्मराश्यति ॥ अप
वे भूतः कृष्णः नः प्रीयतं प्रीयतामिति ॥ २६ ॥ इति श्रीभावार्थदीपिकायां दशमस्कंधे षड्विंशो ध्यायः ॥ २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

षट्विंशोदशमेषड्कः षट्विंशोदशमो हरिः यतनक्षपंच विंशमो वनुविंशुतान्नि: प्रत्यक्॥ सप्तविंशोनदालहस्त्कृ
स्यस्पप्रभवं परम॥ वराग्निनेसभीद्वाभ्यामभिषेकमहोत्सवः॥ गोवर्धने धृते शैले इति शक्रस्य भयेनागमने हेतुः
तत्र रंद्वस्यागत्या किंकृतं वांतलयाह॥ त्रिविक्रमउपमस्येत्यादिना॥ प्रयाह स्तवभिर्विस्पनेतग्रंथेन॥१॥ त्रिविक्रमपको
नेपारयोः॥ यस्यश्रीतनमस्तुकारकर्यं धूतः कृतनहेलनः कृतावज्ञः॥२॥ प्रस्य स्त्रीकृतस्य स्पष्टतत्तथ्यो सो प्रभु
भावः दृष्टः कृतानुभावो येन सदृष्टः॥ नष्टस्त्रिलोकेशोहमितिमदो यस्य सः॥ तत्र ममापराधं दन्मसह इ

शुकं ३ वा ४॥ गोवर्धने धृते शैले प्रामाराइत्तिते व्रजे॥ गोलोकादा व्रजन् कसंसवभिः शकपव
च त्रिविक्रमउपसंगम्य बद्धो इतिः कृतनहेलनः॥ यस्य श्रीपादयोरेनंकिरीटेनार्कवर्चसा॥ ५ दृष्टकृ
तानुभावोस्यसकृत्स्वामितनेनमः॥ नष्टस्त्रिलोकेशमदः इदं प्राह कृतांजलि॥६॥ विशुद्ध
सत्वं तव धाम शांतं तपोमयं ध्वस्तरजस्तमस्कं॥ मायामयोयं गुणसंप्रवाहो न विद्यते ते ग्रहणानुबंधः
॥ कृतनरमाहविशुद्धसत्वमितिचतुर्भिः॥ ९॥ विशुद्धसत्व
तिवक्तं तवधामावरणाधीनास्मेवतत्वयानुग्रहः॥ कृतनं सर्वज्ञात्मितार्थः॥ कृतः ध्वस्तरजस्तमस्को ध्वस्तप्रवि
धामसत्वरूपं पानमेकरूपं प्रतस्वतपोमयं प्रबुरज्ञानं सर्वज्ञात्मितार्थः॥ कृतः ध्वस्तरजस्तमस्कंध्वस्तप्रवि
यमानेरजस्तमसीयस्मिन्॥ अत एवायमस्मदादिवदुपपन्नो मायाकार्येभ्यो गुणसंप्रवाहः॥ गु
ताः मयास्यते इति तयासंसारइत्यर्थः॥ सतेतवनविद्यते पनः अग्रहणेनाज्ञानेनानुबध्यते इति तथा॥ स
वेत्त स्यलेनास्तीत्यर्थः॥ अज्ञानसंबंधोवायराग्रज्ञानानलकृतदेह संबंधोनस्यः नराणांकृतानानां लोभा

श्री
भा ८
हरी
१०२

देईयाकृतोविवितियत्रिमेदान ॥ देहलोभयोः यस्याराजुपनाननकृताः देहसंबंधकृताः नइतवः लोभादयः पुनरन्यस्पदे
लोभमन्युमोहादयस्तवेति ॥ नग्नानिलामपितेरपंपने ॥ प्रतग्राह ॥ अबुधलिंगभावाः ॥ अज्ञानेननोगमकाः हस्पहेतवः २
अज्ञानसूचकाइत्यर्थः ॥ यावद्रागादिमत्वंतावज्ज्ञानितमेवासिद्धमित्यर्थः ॥ लोभाद्यभावोपि ॥ मन्मानसं
गोरंडार्थमित्याह ॥ तथापीतिननुबद्धे ममगोपालपुत्रस्यकाशक्तिः ॥ विवकारणंकोवादंडोमया
कृतइत्यतआह पितेति ॥ जगतांजनपिताजनकः गुरुरुपदेष्टा ॥ अधीशोनियंतेतिदंडधारणेहेतुत्रयम
उक्तोनुक्तेहेतवेईशानकृतालोभादयोऽबुधलिंगभावाः ॥ तथापिदंडंभगवान्बिभर्तिधर्मस्यगु
प्त्यै खलनिग्रहाय ॥ पितागुरुस्त्वंजगतामधीशोदुरत्ययःकालउपात्तदंडः ॥ हितायवे
च्छातनुभिःसमीहसेमानंविधुन्वञ्जगदीशमानिनाम् ॥ ८ ॥ येमद्विधाज्ञाजगदीशमानि
नस्त्वांवीक्ष्यकालेभयमाशुतन्मदं ॥ हित्वार्यमार्गंप्रभजंत्यपस्मयाईहाखलानामपितेनुशा
कालस्वात्समर्थःतस्माद्दंडोलीलावतारैस्समीहसे ॥ नवसमीहालीलेवजगदीशमानिनामस्माकंमानं
विधुन्वन्नइत्यर्थः कृपमेवरित्याहयइति ॥ ९ ॥ मद्विधाज्ञते अज्ञाः मद्विधाज्ञाजगदीशमानिनः कालेभयकालेपि
यथायेवानिकृष्टोवाममयेभयरहितेवीक्ष्य ॥ आशुतन्मदंजगदीशत्वमदंहित्वाविगतगर्वाः संतः आर्य
मार्गंभजंति ॥ अतस्तवेहखलानामनुशासनंदंडइत्यर्थः ॥ एवंभगवन्नत्वरूपममभिप्रायंचानुवर्ण्य
तमाययति ॥ सत्वमिति ॥ ७ ॥ इति १०२

एवंभूतामेवमतीमतिः पुनर्माभूत्इति प्रार्थनानंतरं महात्मनः यमपराधः गोपालकनृपः कथंतत्तत्वद्यइति वेदत
श्राद्धनवेति ॥८॥ भुवोभराणां पुनः चऊरूभावजन्मानोऽद्भुणां बहूनां भासाणां जन्म येभ्यस्तेषां चमूपतीनाममभा
वायदेवम यथुष्मत्वरणेमविनोतुभवाय ॥ श्रुतोमममनवेमेव कत्वादन्तेता पराथिनोपि तत्तत्वाश्रितिभावः
तमापयत्र मस्करोति ॥ नमइति ॥ नमस्ते भगावते कृष्णायनमः पुरुषाय सर्वांतर्यामि ॥ महात्मने ॥ श्वेतः स्य

मत्वंममेम प्रार्थयेविलुतस्पहृनाहुमस्तेविदम्रः प्रभावम ॥ त्वंतेप्रभो यादृस्मिन्भवेनमामैवं पुनर्भ
वातिरीशमेमती ॥८॥ नवावतारोयं मयोत्तं नेहेभुवोभराणाम्भूभावजन्मनां ॥ चमूपतीनामभवा
यदेवभवाययुष्मत्स्वरणानुवर्तिनाम् ॥९॥ नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ वासुदेवाय हा
सायसात्वतांपतयेनमः ॥१०॥ स्वच्छंदोपात्तदेहाय विशुद्धज्ञानमूर्तये ॥ सर्वस्मैसर्ववीजाय सर्वभू
तात्मनेनमः ॥११॥

स्वेच्छापरिग्रहिताय ततः वासुदेवाय सर्वनिवासाय सात्वतां यादवानां पतये तर्हि किमहं यादवो नेत्याह ॥१०॥
तेषांभक्तानांछंदेन स्वयास्वीकृतदेहाय तत्रापि विशुद्धज्ञानमेवमूर्तिर्यस्यतस्मैमायया सर्वंस्मैक्षेततः स
देस्यवीजायकामभरणाय सात्वतपवसर्वभूतानामात्मने नमः इति कृ नागमस्तुत्पनेनोक्तमपरार्धं निवेदयति ॥ मयेद
मिति ॥।॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
स्कं
१०

त्रयस्त्रिंशत्
कोटिदे २

आसारवायुभिः गोष्ठनाशाय इदं मखभङ्गं त्वं चेष्टितं कृतम्॥ १२ ॥ तथापि ईशानुगृहीतोऽस्मि॥ अनुग्रहं दर्शया-
ति ध्वस्तस्तम्भ यतो वृथोद्यमः ईशितव्य॥ ईश्वरत्वात्स्वाभिप्रायेनिवेदितं भगवानपि तथैवाहं मयेति॥ १४ ॥ इन्द्रश्रिया मयेति २
ऐश्वर्येण॥ १५ ॥ १५ ॥ वः युष्माभिः बद्धैर्वर्तनं कर्तव्यमभिप्रायेण॥ ननु स्वाधिकारेषु स्वगोपितं वैशस्त्र्यं रतादि

मयेदं भगवन् गोष्ठनाशायासारवायुभिः॥ चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना॥ १५ ॥ त्वयेशा-
नुगृहीतोऽस्मि ध्वस्तस्तम्भो वृथोद्यमः॥ ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः॥ १६ ॥ श्रीशुक उवाच॥
एवं संकीर्तितः कृष्णो मघोना भगवानमुम्॥ मेघगम्भीरया वाचा प्रहसन्निदमब्रवीत्॥ १७ ॥ मया श्रीभगवानुवाच
तेऽकारि मघवन् मखभङ्गोऽनुगृह्णता॥ मदनुस्मृतये नित्यं मत्तस्येन्द्रश्रिया भृशम्॥ १८ ॥ मामैश्व-
र्यश्रीमदान्धो दण्डपाणिं न पश्यति॥ तं भ्रंशयामि सम्पद्भ्यो यस्य चेच्छाम्यनुग्रहम्॥ १९ ॥ गम्यतां शक्र
भद्रं वः क्रियतां मेऽनुशासनम्॥ स्थीयतां स्वाधिकारेषु युक्तैर्वः स्तम्भवर्जितैः॥ २० ॥ अथाह सुरभि कृष्ण=
मभिवन्द्य मनस्विनी॥ स्वसन्तानैरुपामन्त्र्य गोपरूपिणमीश्वरम्॥ २१ ॥ सुरभिरुवाच॥ कृष्ण कृष्ण म-
हायोगिन् विश्वात्मन् विश्वभावन भवता लोकनाथेन सनाथा वयमच्युत॥ २२ ॥ ॥ ॥

तिष्ठतु तावत् क्रियतामिति मदनुशासनेन॥ यथापूर्वं तत्र स्थीयतामित्यर्थः॥ युक्तैर्वः समन्तैः स्तम्भवर्जि-
तैर्निरहङ्कारैः॥ हे कृष्ण कृष्ण इत्यादि महायोगिन् सनाथा वयं कृता भवतेत्यर्थः॥ १८ ॥ ॥ ॥

१०२

स्वसंतानैर्गोभिः सह॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वंनः परमंदैवंदेवताहेजगत्पतेगोविप्रदेवानांयेऽन्येचसाधवः तेषांभवायअभ्युदयायत्वमेवदेवंतनुभ इंद्रोभवेः
वतीनामिंद्रोऽसि तस्मात्त्वमिंद्रमिति ॥२०॥ एवंप्रकारेंदमस्येंद्रत्व यत्पर्यः नन्वेदेवइंद्रोभवतिमनुष्याहंकः

निवेद २

न २

त्वंनः परमकंदैवंत्वंनइंद्रोजगत्पते॥भवायभवगोविप्रदेवानांयेचसाधवः॥२०॥इंद्रंनस्त्वाभिषिंचा
मोब्रह्मणाचोदितावयं॥अवतीर्णोसिविश्वात्मन्भूमेर्भारापनुत्तये॥२१॥श्रीशुकउवाच॥एवंकृष्णमुपा
मंत्र्यसुरभिःपयसात्मनः॥जलैराकाशगंगायाऐरावतकरोद्धृतैः॥२२॥इंद्रःसुरर्षिभिः॥साकंनो
दितोदेवमातृभिः॥अभ्यषिंचतदाशार्हंगोविंदइतिचाभ्यधात्॥२३॥अहंहिइंद्रोदेवानांत्वंगवामि
इंद्रतांगतः॥गोविंदइतिलोकेत्वांगास्यंतिभुविमानवाः॥२४॥तत्रागतास्तुं
बुरुनारदादयोगंधर्वविद्याधरसिद्धचारणाः॥जगुर्य
शोलोकमलापहंहरेःसुरांगनाःसं
ननृतुर्मुदान्विता॥२५॥॥

यमिंद्रोभवेयमितिनिवेदनप्रकारःअवतीर्णोसीति॥२१॥सुरभिरात्मनःपयसाभ्यषिंचत्॥इंद्रश्चाकाशगंगाजलैरः अभ्यषिंचत् २
देवमातृभिःदेवमातृभिरादित्यादिभिःदेवमातृभिःप्रेरितोगावःपश्चात्गोस्वर्गेवाइंद्रत्वेनविंदती
तिगोविंदत्वमभ्यधात्नामकृतवानित्यर्थः॥२३॥ ॥

कत्वा २

देवनिकायेषु देवसमन्तु हृष्टकेतवः प्रदर्शनीयास्त्वाश्चर्यः गावः गोष्ठीपयोभिर्दु नामाइनामे नयन्
अकृष्टवृत्तिनयथः ॥२५॥ नानारसौघाः स्त्रीनादिवाहिन्यः अकृष्टपच्याः कर्षणं विनैव पक्वाः ऊषधयो व्रीला
दयो ऽबिभ्रन्नुन्मणीन् गर्भगतानां मणीन् उद्गतान् बहिः प्रकटान् अविभ्रु: ॥२६॥ इति श्रीभावार्थदीपि
कायां दशमस्कन्धे सप्तविंशोऽध्यायः ॥२७॥ अष्टाविंशे ततो नन्दानयनं वरुणालयात् वैकुण्ठदर्शनं नाथ

तं तुष्टुवुर्देवनिकायकेतवो ह्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ॥ लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गाव
स्तदा गामनयन्पयोद्रुताम् ॥२५॥ नानारसौघाः सरितो वृक्षा आसन्मधुस्रवाः ॥ अकृष्टपच्यौषधयो
गिरयोऽबिभ्रन्नुन्मणीन् ॥२६॥ कृष्णेऽभिषिक्त एतानि सर्वाणि कुरुनन्दन ॥ निर्वैराण्यभवंस्तात क्रू
राण्यपि निसर्गतः ॥२७॥ इति गोगोकुलपतिं गोविन्दमभिषिच्य सः ॥ अनुज्ञातो ययौ शक्रो वृतो दे
वादिभिर्दिवम् ॥२८॥ इति श्रीभागवते महापुराणे दशमस्कन्धे सप्तविंशोऽध्यायः ॥२७॥ श्रीशुक उवाच ॥
एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ॥ स्नातुं नन्दस्तु कालिन्द्यां द्वादश्यां जलमाविशत् ॥१॥
तं गृहीत्वानयद्भृत्यो वरुणस्यासुरोऽन्तिकम् ॥ अवज्ञायासुरीं वेलां प्रविष्टमुदकं निशि ॥२॥

गोपानामनुवर्त्तिने ॥ गोवर्धनं समुद्धृत्य वशीकृत्य नाऽपि देवं ॥ नंदानयनं ततः कृष्णो वरुणं वशे नयत् ॥ कला
मात्रायां द्वादश्यां पारणादशिनि वेशीनासुरीं वेलामविज्ञाय वारुणो दूत्यानयत् एवमवशास्त्र बलेन निषुर
के आविष्टे नंदने भीतो वरुणः सम्भ्रमेणानयदिति ॥ तथा च शास्त्रं कलार्द्धं द्वादशी हृष्टा निशीथात् हर्यं मदवाह्
प्रातः मध्याह्नः क्रियाः सर्वाः कर्तव्याः शंभुशासनादिति वचनात् एवं वरुणं ॥ अमानेन ताम कनोति श्रीमत्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्वानांभगवद्दर्शनेनवातांअभयदः माभैष्टेतिअभयंदत्त॥२॥सपर्ययाअर्हतोतत॥४॥अद्येदानीमेवदेहो।
निभृतः भृतः यदात्वद्दर्शनंजातंतदेवमामकत्वंप्राप्तमित्यर्थः यद्वानिभृतः पूर्णमनोरथ इत्यर्थः किंचअद्यै
वार्थोऽधिगतः सर्वरत्नाकरपतिनापिइत्यर्थः पूर्वंनैवंविधोर्थःप्राप्त इत्यर्थः किंचसमारोपिह्नत्पवेत्पाद्य

तत्रभगवत्सहाहदर्शनंकृतसमवामीतिगोपकाः॥ भगवांस्तद्बन्धूनांपितरंवरुणाहृतं॥३॥नंदेति
तदृष्ट्वास्तमवसंयंतःकृष्णस्तवामेतिगोपकाः॥ भगवांस्तडुपकृत्यपितरंवरुणाहृतं॥३॥नंदंति
केगतोराजन्स्वानामभयदोविभुः॥३॥प्राप्तंवीक्ष्यहृषीकेशंलोकपालसपर्यया॥महत्या
दृष्ट्वायीवाहतद्दर्शनमहोत्सवः॥४॥वरुणः॥ अद्यमेनिभृतोदेहअद्यार्थोधिगतःप्रभो॥त्व
त्पादभाजोभगवन्नवापुःपारमध्वनः॥५॥नमस्तुभ्यंभगवतेब्रह्मणेपरमात्मने॥नयत्रश्रू
यतेमायालोकसृष्टिविकल्पना॥६॥अजानतामामकेनमूढेनाकार्यवेदिना॥आनीतो
यंतवपितातद्भवान्क्षंतुमर्हति॥गोविंदनीयतामेषपितानोपितृवत्सल॥८॥श्रीशुकः॥प
वंप्रसादितःकृष्णोभगवानीश्वरेश्वरः॥ आदायागात्स्वपितरंबंधूनांचावहन्मुदं॥९॥

येनाह॥ त्वत्पादभाजइति॥अध्वनःपारंमोक्षं॥५॥भगवतेनिरतिशयैश्वर्याय॥ब्रह्मणेशरीरयपर
मात्मनेसर्वजीवनियंत्रेतस्मैनमः नयत्रेतिलोकसृष्टिंविकल्पयतियामायासायत्रनश्रूयतेअवि
द्यमानैवनिरुप्यतेइत्यर्थः॥६॥अजानतामजानत्पनवत्पितरंहरणायप्रहितेनदृतिना॥नेदंविमुच्यसमर्प

ममाप्यनुग्रहंकृष्णकर्तुमर्हस्यशेषदृक्॥

दशम टी २८

श्री भाग० पूर्वे १५

अतीन्द्रियमदृष्टपूर्वं लोकपालस्य महोदयमैश्वर्यं ॥१०॥ औत्सुक्ययुक्ता धीर्येषां ते अपि किं स्वगतिं स्व-
स्थानं सूक्ष्मां ब्रह्मरूपां वा ॥ उपाधास्यत ॥ उपधास्यति नेष्यत्यस्मान् प्रापयिष्यतीति संकल्पितवन्त इत्यर्थः ॥
॥ इत्येवंभूतं स्वानां स्वेषां संकल्पमखिलदृक् सर्ववित् ॥ स्वयमेव विज्ञाय तेषां संकल्पसिद्धये कृपया ॥

नंदस्त्वतीन्द्रियं दृष्ट्वा लोकपालमहोदयं ॥ कृष्णे च संनतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥१०॥
ते चौत्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरं ॥ अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥११॥
इति स्वानां स भगवान्विज्ञायाखिलदृक्स्वयं ॥ संकल्पसिद्धये तेषां कृपयैतदचिंतयत् ॥१२॥ ज-
नो वै लोक एतस्मिन्नविद्याकामकर्मभिः ॥ उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् ॥१३॥ इति
संचिंत्य भगवान्महाकारुणिको हरिः ॥ दर्शयामास लोकं स्वं गोपानां तमसः परं ॥१४॥ सत्यं
ज्ञानमनंतं तद्ब्रह्म ज्योतिः सनातनं ॥ यद्धि पश्यंति मुनयो गुणापाये समाहिताः ॥१५॥

एतद्वक्ष्यमाणमचिंतयत् ॥१२॥ अविद्या देहाद्यहंबुद्धिः ततः कामः ततः कर्म तत उच्चावचासु देवतिर्य-
गादिषु भ्रमन् ॥ स्वां गतिं न वेद स्वं ब्रह्मस्वरूपं लोकं वैकुंठाख्यं तमसः प्रकृतेः परं ॥१४॥ देहादिपि-
हितानां दर्शनमशक्यमिति ॥ अयमर्थः देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामास तत्राह सत्यमिति सत्यमब-
ाध्यं ज्ञानमजडं ॥ अनंतमपरिच्छिन्नं ज्योतिः स्वप्रकाशं सनातनं शाश्वत् निर्द्वंद्वं गुणापाये गुणापोहे ह्रा

१०५

ब्रह्मह्रदं ब्रह्मैव ह्रदः॥ तत्र तिमग्नस्य विशेषविज्ञानाभावात्॥ तं ब्रह्महृदं तेन नीताः स्थापिताः तस्मिंश्च
मग्नाः स्वलयात्युत्कर्षं समाह॥ पुनः कृष्णेनोद्धृताः समाधेरिवोत्थापिताः संतो ब्रह्मणः स्वस्यैव लोकं
वैकुंठाख्यं ददृशुरिति न तु ब्रह्मणि लीनानिमग्नानां पुनर्लोकदर्शनमघटितमेवेत्याशंक्याह॥ यत्रेति॥ यत्र यस्मिं
न्कृष्णे निमित्ते सति एवं मक्रूरोऽध्यगाद्दृष्टवान्॥ शुकपरीक्षित्संवादात्मा कं वा सूतनिर्देशः॥ नत्व
तर्कैश्वर्ये भगवति किंचिदप्यसंभावितमित्यर्थः॥ अथवा अक्रूरो यत्र दृष्टवान्॥ तस्यैव यमुनाह्रदस्य

तेन तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः॥ ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्पुरा॥१७॥ नंदा
दयस्तु तं दृष्ट्वा परमानंदनिर्वृताः॥ कृष्णं च तत्र छंदोभिः स्तूयमानं सुविस्मिताः॥१८॥ इति श्रीभा
गवते दशमस्कंधे अष्टाविंशोऽध्यायः॥२८॥

ब्रह्मह्रदं ह्रदस्तेनाम तं हृदं नीताः संतो ब्रह्मणो लोकं ददृशुः॥ पुनश्च कृष्णेनोद्धृताः पूर्ववन्नंदं दृष्ट्वा विस्मिता
वभूवुरिति नित्यवहितान्वये॥ अप्रसिद्धं कृष्णेनावसीदन्त्येवेति यद्वा॥ अक्रूरोऽध्यगाद्दर्शितवांस्तस्यैव ध्यानि भावि
विभूतवदुपचारः॥ न क्रूरः अक्रूरो योगी संसारनिवृत्तो सम्यक् परलोकमधिगच्छतीत्यर्थः॥१७॥ तत्र तस्मिन्हृदे
कृष्णं छंदोभिर्वेदैः स्तूयमानं दृष्ट्वा विस्मिता वभूवुः॥१८॥ इति श्रीभावार्थदीपिकायां वृत्तिविंशोऽध्यायः॥२८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८२ २१

श्री० भाद० पूर्वे० १०६

कृतविषयेन्तु रासार्थं मुक्तिप्रमुक्तयो हरेः ॥ गोपीभी रासरसंभ्रमे तस्य चौर्न ह्रियते किं तस्मै ब्रह्मादिजयसंरूढ
दर्पकंदर्पदर्पहा जयति श्रीपतिर्गोपीरासमंडलमंडनः ॥ ननु विपरीतमिदं परदारविनोदेन कंदर्पविजेतृ
त्व प्रतीतेः ॥ मैवं योगमायामुपाश्रितः ॥ आत्मारामोप्यरीरमत् साक्षान्मन्मथमन्मथः ॥ आत्मन्येवरूढे सो
रतस्त्यादिषु स्वातंत्र्याभिधानात् ॥ तस्माद्रासक्रीडाविडंबनं कामजयख्यापनायेत्येव तत्त्वं ॥ किंच शृंगा
रकथापदेशेन विशेषतो निवृत्तिपरेयं पंचाध्यायीति व्यक्तीकरिष्यामः ॥ तारात्रीरिति यातनावलाव्रजे

शुकः ॥ भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ॥ वीक्ष्य रंतुं मनश्चक्रे योगमायामुपाश्रितः
१ ॥ तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः ॥ स चर्षणीनामुदगाच्छुचो मृ
जन्प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं
म ॥ वनं च तत्कोमलगोभिरंजितं जगौ कलं वामदृशां मनोहरं ॥ ३ ॥ नये १
सिद्धाम येमा रंस्यथ क्षपा इति प्रतिश्रुतं इत्यर्थः ॥ तदा तस्मिन्नेव क्षणे तस्मिन्उडुराजः चंद्रः उदगात् उदि
तं किं कुर्वन् ॥ दीर्घकालेन दर्शनं यस्य सः स्वप्रियायाः मुखं अरुणेन कुंकुमेन यथा प्रियो विलिंपति ॥ तथा।
प्राच्याः ककुभो मुखं शंतमैः सुखतमैः करैः रश्मिभिः ॥ अरुणेनोदयरागेन विलिंपन् अरुणीकुर्वन् त्या।
र्थः ॥ स प्रसिद्ध उडुराजः तथा चर्षणीनां जनानां शुचः संतापं व्यालीकं ॥ मृजन् अपनयन् ॥ २ ॥ कुमुद्वं विकासनी
यं यस्य तं कुमुद्वंतं ॥ अखंडमंडलं परिपूर्णमंडलं रमायाः आननस्य भेवाभा यस्य तं ॥ एवंविधं च तथा वनं च तत
स्य कोमलैः गोभिः रश्मिभिः रंजितं दृष्ट्वा कलं मधुरं जगौ अगायत ॥ कथं वामदृशां वामाः कमनीयाः दृशो यासां

सुध २
१०६

प्रिय १

नवकुंकुममिवारुणं २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हं॰ तयोर्गतिर्वेद्युत्त्येः ८

पुत्रानादिश्यपतिपुत्राणांमादेशोमुत्रिणामग्रेकथयपिता ॥ ८१ ॥ ८२ ॥ आत्मशौचंमनःशोधकं ॥ पारमेष्ठ्यंसर्वोत्कृष्टफल
दं ॥ ८४ ॥ स्त्रीबुद्धिस्तत्रादिनस्याश्रमोस्वकामःछिन्नोभवति ॥ अमुत्रचकर्मफलभोगःकथमितिसंशयःछिन्नः ॥ ८५ ॥ इतिश्री
चतुर्थेएकोनत्रिंशः ॥ अमंगात्स्वंवभिःश्लोकैर्वृत्तंप्राचीनबर्हिषःपुत्रैःपृष्टेनेवपुनर्हिंभ्योप्रस्तुतंवक्ष्येवर्णतोननत्रिंशतपस्त्र

श्रीमैत्रेयः भागवतमुख्योभगवान्नारदोहंसयोर्गतिं ॥ प्रदर्श्यह्यमुमामंत्र्यसिद्धलोकंततोगमत् ॥ ८० ॥ प्राचीन
बर्हिः ॥ राजर्षिःप्रजासर्गाभिरक्षणे ॥ आदिश्यपुत्रानगमत्तपसेकपिलाश्रमं ॥ ८१ ॥ तत्रैकाग्रमनावीरोगोविंदच
रणांबुजं ॥ विमुक्तसंगोनुभजन्भक्त्यातत्साम्यतामगात ॥ ८२ ॥ एतदध्यात्मपारोक्ष्यंगीतंदेवर्षिणानघ ॥ यःश्राव
येद्यःशृणुयात्सलिंगेनविमुच्यते ॥ ८३ ॥ एतन्मुकुंदयशसाभुवनंपुनानंदेवर्षिवर्यमुखनिःसृतमात्म।
शौचं ॥ यःकीर्त्यमानमधिगच्छतिपारमेष्ठ्यंनास्मिन्भवेभ्रमतिमुक्तसमस्तबंधः ॥ ८४ ॥ अध्यात्मपारोक्ष्य
मिदंमयाधिगतमद्भुतं ॥ एवंस्त्रियाश्रमःपुंसःछिन्नोमुत्रचसंशयः ॥ ८५ ॥ इतिश्रीभागवतेमहचतुर्थस्कंधेए
कोनत्रिंशोध्यायः ॥ विदुरः ॥ येत्वयाभिहिताब्रह्मन्सुताःप्राचीनबर्हिषः ॥ तेरुद्रगीतेनहरिंसिद्धिमापुःप्र
नोष्यकां ॥ १ ॥ किंबार्हस्पत्येहप्रचवाथकैवल्यनाथप्रियपार्श्ववर्तिनः ॥ आसाद्यदेवगिरिशंयदृच्छया
प्रापुःपरंनूनमथप्रचेतसः ॥ २ ॥ ॥ राम ॥ ॥
॥ ॥ ॥ ॥

ते २

ष्टादीशान्तंब्रूवरस्तनः ॥ आगत्यवादेवीमुद्दाम्रराज्यंवक्रुविनीर्यते ॥ २ ॥ हरिंप्रनोष्यकांसिद्धिमापुः ॥ हेबार्हस्प
त्यवा ॥ स्याविहिया यांहृह स्यमैत्रेयः ॥ पाद्मइतिख्यानकं ॥ ३ ॥ तेपरमयागिरिशंप्राप्य ॥ तस्यैवकैवल्यनाथप्रिया
स्यागिरिशस्यपार्श्ववर्तिनः ॥ नरदत्तगृहीनाःसंतोनूनंपरंमोक्षंप्रापुरेव ॥ ततःपूर्वंतुश्रमश्रयवायवजकिंप्रापुः
२ ॥

कदर्यीनेनजपदरूपेण यज्ञेनतनयमावपुर्वेजनंद‌र्वितेषांकृत्वेनपृः क्लेशोकचाकान्त्या शमयन॥ शांतेनसुरूपेणवपुषाश्रावि
र्भूतः॥४॥ सुपर्णास्कंधमारूढः इत्यादिनावर्हिष्मतः सनातनाहितिलक्षितीयेनान्वयः॥५॥ कनककमयेनस्वर्णवर्णविभूषणेन
नग्राजमानकंकपोलंवदनंयस्यसग्रहप्रभितायुधैः गरुडपक्षकिन्नरैः तेनपदौस्तवनैर्गीतानाकीर्तिर्यस्य॥८॥ पीनाश्चते प्रायता

वेवयः॥ धंवंतसौतरुद्धोपितुरादेशकारिणः॥ जपयज्ञेनतपसा पुर्वेजनमतोषयन्॥३॥ दशवर्षसहस्रां
ते पुरुषस्तुसनातनः॥ तथामाविरभूत्कृच्छ्रं शांतेनशमयनरुचा॥४॥ सुपर्णस्कंधमारूढोमेरुशृंगमिवांबु
दः॥ पीतवासामणिग्रीवः कुर्वन्वितिमिरादिशः॥५॥ काशिष्णुनाकनकवर्णविभूषणेनभ्राजत्कपो
लवदनोविलसत्किरीटः॥ अष्टायुधैरनुचरैर्मुनिभिः सुरेंद्रैरासेवितोगरुडकिन्नरगीतकीर्तिः॥६॥ पीना
यताष्टभुजमंडलमध्यलक्ष्म्यास्पर्धच्छ्रियापरिवृतोवनमालयाद्यः॥ बर्हिष्मतः पुरुषआहसुतान्प्रप
न्नान्पर्जन्यनादरुतयासघृणावलोकः॥७॥ श्रीभगवानुवाच॥ वरंवृणीध्वंभद्रंवोयूयंमेनृपनंदनाः सौहा
र्देनापृथग्धर्मास्तुष्टोहंसौहृदेनवः॥८॥ योनुस्मरतिसंध्यायांयुष्माननुदिने
नरः॥ तस्यभ्रातृष्वात्मसाम्यंतथाभूतेषुसौहृदं॥९॥ राम

॥ ॥ ॥

अष्टाभुजानांतेषां मंडलंसमूहः॥ तन्मध्येस्थितयालक्ष्म्यास्पर्धमानश्रीः शोभायस्याः तयावनमालयापरिवृतआद्यः पुरु
षआह॥ पर्जन्यस्यनादइवरुतंनादोयस्याः तयावाचासघृणः वलोकोयस्य॥७॥ यूयंमत्तोवृणीध्वंसौहार्देनहेतुनाअ
पृथक्धर्मीयेषांसंबोधनंवः॥ परस्परंसौहृदेनतुष्टोहं॥८॥ भूतेषुसौहृदंचभविष्यति॥ ७ ॥ ॥ ॥

२१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेभ्यो दास्येति किं पुनर्युष्मभ्यमिति शेषः ॥९॥ अगृहीष्ट गृहीतवंतः अथो इति हेतोः लोकाननु लोके भविष्यतीत्य॰
हालोकाननुभविष्यतीत्यर्थः ॥१०॥ आत्मनो वीर्यमात्मतेजो नेन ॥११॥ पुत्रार्थं मा दीक्षा यां संपादयति कंडो
रिति त्रिभिः तपोनाशनार्थं महेंद्रप्रेषितया प्रम्लोचया कंडुर्नाम ऋषिर्बहुकालं वैमेसावतन ॥ स्वर्गं गच्छंती कंडोर्जी
तं गर्भं वृक्षेषु न्यस्ता जगाम तं दनं कं ॥१२॥ स गर्भ सिदो वनस्पतीनां राजा सोमः ॥ अमृतस्रावि किरणैः दं त्यासस्या मुखे न दि
अथ विद्धात्यक्तो॰ दक्षिणी तर्जनी १

येनु मां कंडू गर्भे तेन सायं प्रातः समाहिता ॥ स्तनं वंत्य हे काम वयानदास्ये प्रज्ञांव शोभनां ॥१०॥ यायूयं पितुरादेशा
मगृहीष्ट मुदान्विता ॥ अयं वंड शती कीर्तिर्लोकाननुभविष्यति ॥११॥ भविता विश्रुतः पुत्रौ न मावल लोर्ण व॰
गुणैः ॥ य यनामात्मवीर्येण विलोकी पूरयिष्यति ॥१२॥ कंडोः प्रम्लोचया कन्या लब्ध्वा कमललोचना ता
चापविद्धा जगृहुः भूरुहान्नृपनंदनाः ॥१३॥ लतन्दामायामुखे राजा सोमं पीयूषवर्षिणीं दे शिनी रोदमा
नां यानि दधे मदयान्वितः ॥१४॥ प्रजाविसर्गआदिष्टाः पित्रा मामनुवर्तता ॥ तत्र कन्यां वरारोहां तामुद्वहत
माचिरं ॥१५॥ अपृथक् धर्मशीलानां सर्वेषां वः सुमध्यमा ॥ अपृथग्धर्मशीलेयं भूयात्मत्तनूपिनाज्ञया ॥१६॥

॥ ॥ ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥
॥ ॥ ॥

ये ॥ अनेनाप्सरसो गर्भं संभवे नामता हो वृणा च तस्या लावण्ये ॥ त्वमस्वेदे दौर्गंध्यादिराहित्यं चोक्तं ॥१४॥ मर्म नुवर्ते
मानेन पिज्ञातिपुत्राः संतः तत्प्रजासर्गनिमित्तं तामुद्वहत ॥१५॥ ननु बहूनां कथमेका भार्या स्यात्तत्राह ॥ अपृथक्
धर्मः शीलं च येषां तेषां पत्नी भूयात् ॥ अर्पिता भवत् सम्प्राशयायया ॥ धर्मशीलयो वैक्यात् ॥ महाकाव्यनरदृष्टादृष्ट
विरोध इति भावः ॥१६॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाव टी ५०

शृद्धतोनमः प्रपन्निहतबन्धाः मेन ॥ १७ ॥ पद्मगुणोदयकामादिमित्राश्रयो यथा प्रतः लोकद्वयभोगान्निर्विघ्नमस्यानं
प्राप्य ॥ १८ ॥ ननु शृद्धेषु प्रविष्टा वयमस्माकं तद्वासनया बंधयवश्यात् कुतस्तद्भक्तिर्निर्वेदोवा तत्राह गृहेष्वितिकुशलं
मय्यर्पितं कर्म येषां महात्मानीया वार्त्तायाम: कालोयेषां ॥ १९ ॥ तद्वार्त्ताश्रोतृणां गृहेनैर्बंधइतिकुतस्तत्राह नव्यवदितिय
स्मात्कथाश्रवणात् नः सर्वत्रात्मा ईश्वरः ब्रह्मवादिभिः प्रवक्तृभिः निमित्तभूतैः श्रोतॄणां हृदयं नव्यवत् प्रतिपदं
नूतनवत् प्रपद्यते ब्रह्मसाक्षात्कारोभवतीत्यर्थः ननु वक्तुं याश्रवणे कोयं ब्रह्मसाक्षात्कारस्तत्राह ॥ हृदि ॥ यी

दिव्यवर्षसहस्राणां सहस्रमहतौजसः । भौमान्भोगान्पयोगान्वेदिव्यांश्चानुगृह्णाम ॥ १७ ॥ प्रपद्मप्रन्नपा
यिन्याम् कल्याणकगुणाशयाः डमयाम्स्वयमहामनिर्विघ्ननिवयादतः ॥ १८ ॥ गृहेष्वाविशतां चापि पुंसां कुश
लकर्मणा ॥ महत्तीयातयामानां न बंधाय गृहामता ॥ १९ ॥ नव्यवद्धृदयेयपज्ञोब्रह्मतत्त्वब्रह्मवादिभिः ॥ नमुत्सं
तिनपूर्णावेतिनहृष्यांतियनोगताः ॥ २० ॥ मैत्रेयउवाच ॥ एवंब्रुवाणं कुरुधार्यं भाजनं जनार्दनं श्रोतुमनायं च प्रवेत
सः ॥ नष्टदर्शीनधर्मतमोरजोमल ॥ भीरागृणन्नाहृदयास्तद्वत्तम ॥ २१ ॥ प्रचेतस ऊचुः नमोनमः क्लेशविना
शनाय ॥ निरूपितोदारगुणाह्वयाय ॥ मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वनेनमः ॥ २२ ॥
॥ ॥॥॥ ॥ ॥ ॥ ॥

हरि

देवब्राह्मणवेदेतुः पतेगताः यंमांप्राप्ताः संतो शोकमोहहर्षान्न प्राप्नुवंति प्रतोस्मत्कथाश्रवणेन नव्यवत्मम
हृदयाविर्भावादस्यैवब्रह्मसाक्षात्कारत्वाद्गृहेषु वसतामपि न बंध इत्यर्थः ॥ २० ॥ पुरुषार्थभाजयतीति तथा ॥
वेदः सर्वात्मरूपः सो धनत्वेन निरूपिताउदारगुणः प्राह्वयानामानि यस्य म नो वचसोर्वेगादपि पुरोजवोवे
गोयस्य मनोवचसो रगोचरायेत्यर्थः अतएव सर्वेषां अक्षाणां मार्गैः अगतः अनवगतोऽध्वाय ॥
स्यतस्मैतेनमः २२ ॥ ॥

स्वनिष्ठया स्वरूपस्थितया शुद्धाय अतः शांताय मनसि निमित्ते सति । अपार्थं व्यर्थमेव विलसन् विस्फुरितं द्वयं यत्र यस्मि
न् । गृहीता मायागुणा विग्रहाः ब्रह्मादिमूर्तयो येन ॥ २३ ॥ स्वतस्तु विशुद्धसत्त्वरूपाय संसार बद्धानि मे धात्रा नं यस्य तस्मै
न । गृहीता माया गुणे विग्रहाः ब्रह्मादिमूर्तयो येन ॥ २३ ॥ ... शा ।
२४ ॥ २५ ॥ अपुंस्त्वमादि कूतन वेत्ता वयं ॥ २६ ॥ यडक्कं वरं वृणीध्व मितितन्मनसि निधाया रूपमिति समस्तानां क्लेशा
नां संक्षयो यस्मात् नः अस्माविष्कृतं प्रकटितं अतो ऽन्यत् ॥ किमनुकंपितं ॥ अनुकंपा ऽयं एवास्माकं परमानुकंपेत्यर्थः

योः

शुद्धाय शांताय नमः स्वनिष्ठयामनस्यपार्थविलसद्द्वयाय ॥ नमो जगत्स्थाननलं दये षु गृहीतमायाग्रुः
णा विग्रहाय ॥ २३ ॥ नमो विशुद्धसत्त्वाय हरये द्विमेधसे ॥ वासुदेवाय कृष्णाय प्रभवे सर्वसात्वतां ॥ २४ ॥
नमः कमलनाभाय नमः कमलमालिने ॥ नमः कमलपादाय नमस्ते कमलेक्षण ॥ २५ ॥ नमः कमल
किंजल्कपिशंगामलवाससे ॥ सर्वभूतनिवासाय नमोयुंक्ष्महि साक्षिणे ॥ २६ ॥ रूपं भगवता त्वनंतदशे
षक्लेशसंक्षयं ॥ आविःकृतं नः क्लिष्टानां किमन्यदनुकंपितं ॥ २७ ॥ एतावत्त्वं हि विभुभिर्भाव्यं दीनेषु व- भं
त्सलैः यदनुस्मर्यते काले स्वबुद्ध्याभद्ररंधन ॥ २८ ॥ येनोपशांतिर्भूतानां क्षुल्लकानामपीहतां ॥ अंतर्हि

तोंत हृदये कस्मान्नो वेद नाशिषः ॥ २९ ॥

कृतइत्यत आह ॥ हे अभद्ररंधन अमंगलनाशन ॥ त्वं पुनस्त्वयोत्तन विवादितः एतावदेव दीनेषु वत्सलैः प्रभुभिर्भाव्यं
कार्यं किंतत्तदाह यदिति ॥ अस्मदीयाः एतद् इतिबुद्ध्या उचिते काले अनुस्मर्यत इति यत् तत्त्वया तु रूपेदर्शितं इतिभा
वः ॥ २८ ॥ येनानुस्मरणेन स्मृतानां तेषामुपशांतिर्महती भवति ॥ किंच क्षुल्लकानामपि भूतानां अंतर्हृदये अंतर्हितः
अंतर्यामि विनश्यितो भवानीहतामिच्छतां अवडपाम् कानां नो अस्माकं आशिषः कस्माद्धेतोर्न वेद जानात्येवेत्यु
॥ २९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तथापि वक्तव्यं चेत्तर्हि यामस्माकं भगवान्प्रसन्नः ॥ असावेव वरः ॥ भगवत्प्रसाद एवास्माकमभीप्सितो वर इत्यर्थः अपवर्ग
गुरुः मोक्षमार्गप्रदर्शकः गतिः स्वतस्त्रपुरुषार्थभूतः ३० ॥ यद्यप्येवं तथापि हे नाथ त्वत्त ॥ वरं वयं वरं वृणीमहे
कथंभूतात्परतः ॥ कारणादपि परात् प्रकृत्यात्परतः ॥ परतः इति कृतेः अनेनोद्यपि ते दातुं समर्थः ॥ नत्वदेयानां तद्विभू
तीनामंतोऽस्ति यतोऽनंतं विभूतिनिवादनेन त्वमनंत इति गीयसे ३१ ॥ तथापि यथा सारंगो भ्रमरः ॥ पारिजाते सेवित्वेन लब्धे सति
तत्तलभमपि न्यत्कुंदंतं न सेवते ॥ तथा वयमपि साक्षात्त्वदंघ्रिमूलं प्राप्य किं किं वृणीमहि न किंचिदित्यर्थः ॥ कि

असावेव वरोऽस्माकमीप्सितो जगतः पते ॥ प्रसन्नो भगवान्येषामपवर्गगुरुर्गतिः ३० ॥ वरं वृणीमहेऽथापि
नाथ त्वत्परतः परात् ॥ न ह्यंतस्त्वद्विभूतीनां सोऽनंत इति गीयसे ३१ ॥ पारिजाते ञ्जसा लब्धे सारंगोऽन्यन्न से-
वते ॥ त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ३२ ॥ यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः ॥ तावद्भ-
वत्प्रसंगानां संगः स्यान्नो भवे भवे ३३ ॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ॥ भगवत्संगिसंगस्य मर्त्या-
नां किमुताशिषः ३४ ॥ यत्रेड्यंते कथा मृष्टास्तृष्णायाः प्रशमो यतः ॥ निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्च-
न ३५ ॥ यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः ॥ संस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः ३६ ॥
तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया ॥ भीतस्य किं न रोचेत तावकानां समागमः ३७ ॥ ॥

॥ ॥ ॥ ॥ ॥

मप्यन्यत्तुच्छं किमर्थं वृणीमहि ॥ तर्हि किं किं वृणीमहि ॥ अनंतत्वेन मनोरथानां अनवस्थानादित्यर्थः ३२ ॥ अतएव
तावदेव प्रार्थयामहे इत्याह ॥ यावदिति स्पृष्टा व्याप्ताः संतः भगवति प्रकृष्टः संगो येषां संगो नो स्यात् ३३ ॥ नतु
राज्यभोगान्स्वर्गापवर्गौ वा विहाय किमिदं प्रार्थ्यते नेत्याह ॥ तुलयामेति भगवत्संगिनां संगस्य लवेनापि ३४ ॥ स
त्संगस्य श्रेष्ठ्यं प्रपंचयति ॥ यत्रेति त्रिभिः यत्र येषु जनः ॥ याभ्यः कथाभ्यः निर्वैरं वैराभावः ॥ ३५ ॥ ३६ ॥ पद्भ्यां पावने

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्तत्संगफलमस्माभिस्त्वानुभूतमित्याह ॥ वयं त्विति त्वं प्रियः सलाजस्य भवस्य श्रुत्वानुमविकित्सस्य तत्स्मतो
मृत्योर्भिषक्तमं सद्दैवं त्वां गतिं गामा ॥ ३८ ॥ वयं तु त्वं त्वाना यत्र इति द्वाभ्यां तत्र ॥ ३ ॥ निरंधसां निरस्त्रानां सद्दस्यं वद
कालांतरे परितोषणाय भव तिति त्वं गृणीमहे ॥ ४ ॥ सज्जानामयमस्माकं च वस्तु निर्नयुक्ते त्याह ॥ मनुरिति यस्य
नवमहिम्नो दृष्टं पारं ये ॥ तेपि तावान्ममसमस्वपाकानुरूपं यथा स्तुवंति ॥ अयोग्रतः वयमपि गृणीम ॥ ४१ ॥ म

वयं तु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन ॥ सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वा
द्यगतिं गताः स्म ॥ ३८ ॥ यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या ॥ आर्या नताः सुहृदो
भ्रातरश्च सर्वाणि भूतान्यनसूययैव ॥ ३९ ॥ यन्नः सुतप्तं तप एतदीश निरंधसां कालमदभ्रमप्सु ॥ सर्वं त
देतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ॥ ४० ॥ मनुः स्वयंभूर्भगवान्भवश्च येन्ये तपोज्ञानविशु
द्धसत्त्वाः ॥ अदृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो त्वात्मसमं गृणीमः ॥ ४१ ॥ नमः समाय शुद्धाय पु
रुषाय पराय च ॥ वासुदेवाय सत्त्वाय तुभ्यं भगवते नमः ॥ ४२ ॥ मैत्रेय उ० ॥ इति प्रचेतोभिरभिष्टुतो ह
रिः ॥ प्रीतस्तथेत्याह शरण्यवत्सल ॥ अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः ॥ अथ
निर्याय सलिलात्प्रचेतस उदन्वतः ॥ वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः ॥ ४४ ॥ ततो
ग्निमारुतौ राजन्नमुंचन्मुखतो रुषा ॥ महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये ॥ ४५ ॥ भस्मसात्क्रिय
माणांस्तान्द्रुमान्वीक्ष्य पितामहः ॥ आगतः शमयामास पुत्रान्बर्हिष्मतो नयैः ॥ ४६ ॥

तस्मात्तुभ्यं वासुदेवाय ॥ ४२ ॥ यानं रथं प्रयाणं वा अनिच्छतां सतामपि स्वं धाम ययौ अनपवर्गवीर्यः अकुंठि
तप्रभावः ॥ ४३ ॥ उदन्वतः सिंधोः सलिलान्निर्याय निर्गत्य गां स्वर्गं रोद्धुमिवोच्छ्रितैर्द्रुमैर्गां महीं छन्नां वीक्ष्य
द्रुमेभ्योऽकुप्यन् ॥ नदाहि हि प्राचीनबर्हिषः प्रवृत्तित्वात् राजके कर्षणाद्यभावात् द्रुमैर्भूमिः छन्ना भूत् ॥ ४४ ॥ नि
रस्ता वीरुधो यस्यास्तथाभूतां कर्तुं संवर्तकः कालाग्निरुद्रः ॥ ४५ ॥ नयैर्युक्तिभिः ॥ ४६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
५१२

उजह्नुः समर्पयामासुः ॥ ४७ ॥ मारिषां वार्क्षीं प्रजनयोनिं ब्रह्मतस्मात् जातो दक्षः मदनः श्रीमहादेवस्यावज्ञानात्पूर्वमजनयो
निजो ब्रह्मपुत्रोपि सन्दक्षो पि यजातो यस्यामजनि जातः ॥ ४८ ॥ प्राक्सर्गे एवं देहे कालेन विद्रुते गतेदेवेन प्रेरणाच्चोदितः से
सृष्टः प्रजाः ससर्जदक्षः सइतिप्रसिद्धः ॥ ४९ ॥ स्वयारुचा प्रभया तेजःपादजस्त्वाष्ट्रादितवान् येचकर्मदाक्ष्याद्दक्षमब्रुव
न् ॥ ५० ॥ तमभिषिच्य प्रजनादिब्रह्मा प्रजासर्गेसरक्षायां प्रयुयोज ॥ सचदक्षोन्यान्मरीच्यादीन्तत्तद्व्यापारे प्रनियुक्तवान् ॥ ५१ ॥

ततश्च वशिष्टस्ये वृक्षाभी नारूहितं वंतदा ॥ उजह्नुः ते प्रचेतोभ्य उपदिष्टाः स्वयंभुवा ॥ ४७ ॥ ते च ब्रह्मणआदेशा
न्मारिषामुपयेमिरे ॥ यस्यां महदवज्ञानादजन्यजनयोनिजः ॥ ४८ ॥ चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गकालविद्रु
ते ॥ यः ससर्ज प्रजा इष्टाः सदक्षो दैवचोदितः ॥ ४९ ॥ यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा ॥ स्वयोपादत्त
दाक्ष्याच्च कर्मणां दक्षमब्रुवन् ॥ ५० ॥ तं प्रजासर्गरक्षायामनादिरभिषिच्य च ॥ युयोजयुयुजेन्यांश्च सवै सर्व
प्रजापतीन् ॥ ५१ ॥ इतिश्रीभागवते चतुर्थस्कंधेत्रिंशोध्यायः ॥ ३० ॥ मैत्रेयः ततउत्पन्नविज्ञाना आश्वधोक्ष
जभाषितं ॥ स्मरंतआत्मजे भार्यां विसृज्य प्राव्रजन् गृहात् ॥ १ ॥ दीक्षिताः

ब्रह्मसत्रेणसर्वभूतात्ममेधसा ॥ प्रतीच्यांदि

शिवेलायांसिद्धोभूद्यत्र

जाजलिः ॥

इतिचतुर्थे त्रिंशः ॥ एकत्रिंशेस्मिन्दक्षे ध्रुवंन्यस्यवनेसतां ॥ नारदोक्तेन मार्गेण मुक्तिरुक्ता प्रचेतसां ॥ ततः दिव्यवर्षसहस्र
णांसहस्रस्यांउत्पन्नविवेकज्ञानाः सन्तःउपयस्यमहामनिरुद्ध पादतउत्पयोतजभाषितंस्मरंतआत्मजे प्राव्रजन ॥ १ ॥
ब्रह्मसत्रेण आत्मविमर्शेन दीक्षिताः कृतसंकल्पाः सर्वभूतात्मनिमेधाज्ञानं यस्मिन् तेन वेलायां समुद्रतीरे जाजलि
र्नाम ऋषिः ॥ २ ॥

३
५१२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निर्जिताः प्राणमनोवचोदृशो यैः तान् शांताउपरताः समानामलाधारादावभ्यस्त जवो विग्रहा येषां ब्रह्मणि योजित आत्मा
यैः सुरासुरैरीड्यो दृष्टवान् ३ स्थायतं प्रणिपत्य यथादिशं यथाविधि पूजयित्वा ॥४॥ आदिष्टमुपदिष्टं यदासक्तानां क्षपितं विस
तं ६ ॥ प्रचेतसां भिः पृष्टः ॥८॥ शुक्लो गृहस्थ स्वजन्याद्धरिसेवां विना सर्वं जन्मादि कर्मादि किं व्यर्थं इत्याह तमिति निनातृ शौच ज्ञादि ॥ तत्र

तन्निर्जितप्राणवचोमनोदृशो जितासनान् शांतसमानविग्रहान् परेमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो
ददृशे स्म नारदः ॥३॥ तमागतं त उत्थाय प्रणिपत्याभिनंद्य च पूजयित्वा यथादेशं सुखासीनमथाब्रुवन् ॥४॥ प्रचे
तस ऊचुः ॥ स्वागतं ते सुरर्षेद्य दिष्ट्या नो दर्शनं गतः तव चंक्रमणं ब्रह्मन्नभयाय यथा रवेः ॥५॥ यदादिष्टं भगव
ता शिवेनाधोक्षजेन च ॥ गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ॥६॥ तन्नः प्रद्योतयाध्यात्मज्ञानं तत्त्वार्थदर्श
नं ॥ येनांजसा तरिष्यामो दुस्तरं भवसागरं ॥७॥ मैत्रेय उ० ॥ इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः ॥ भगवत्युत्तम
श्लोक आविष्टात्माब्रवीन्नृपान् ॥८॥ श्रीनारद उ० ॥ तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः नृणां येन हि विश्वा
त्मा सेव्यते हरिरीश्वरः ॥९॥ किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः ॥ कर्मभिर्वा त्रयी बलेनेंद्रियराध
सा ॥११॥ ॥
प्रोक्तैः पुंसोपि विबुधायुषा ॥१०॥ श्रुतेन तपसा
वा किं वचोभिश्चित्तवृत्तिभिः बुद्ध्या वा किं निपुणया

जन्मादेः
न्मांतिवत्त्रिभिः यतो यस्माद्धरिसेवैव फलं तेभ्यस्तद्धीनं सर्वं व्यर्थमित्यर्थः ॥९॥ शुक्लसंबंधि जन्म विशुद्धं मातापि
तृभ्यामुत्पत्तिः सावित्रं जन्म सावित्रमुपनयनेन याज्ञिकं दीक्षया विबुधानामिव दीर्घायुषापि ॥१०॥ वचोभिः
वाग्विलासैः चित्तवृत्तिभिः नानावधानसामर्थ्यैः ॥ इंद्रियाणां राधसा पाटवेन ॥११॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ५३

योगेन प्राणायामादिना सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण संन्यासेन वेदाध्ययनाभ्यामपि ॥ श्रेयोभिरपि व्रतैर्वान्या
दिभिः श्रेयःसाधनैः ॥१२॥ ननु एषां नानाफलसाधनानां हरिसेवाभावमात्रेण कुतो वैयर्थ्यं तत्राह ॥ श्रेयसां फलानामात्मैवाव
धिः परा काष्ठा अर्थतः परमार्थतः आत्मार्थेन नैवान्येषां प्रियत्वादित्यर्थः भवतामात्मावधिः हरेः किमायातं तत्राह सर्वे
षामपीति ॥ आत्मदः स्वाविद्यानिरासेन स्वरूपाभिव्यंजकः ॥ येषु वरुणादिपितृयागवलिप्रभृतिभ्यो ह्यात्मप्रदः ॥ प्रियश्चाप
रमानंदरूपत्वात् ॥१३॥ किं च नानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्तान्यपि फलानि हरिप्रीत्या भवंति ॥ केवलं तत्तद्देवता
यजनेन तु किंचिदिति सदृष्टान्तमाह ॥ यथेति ॥ मूलात्प्रथमभागाः ॥ स्कंधाः तद्विभागा भुजाः तेषामपि शाखाः उप

किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि ॥ किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥१२॥ श्रेयसामपि स
र्वेषामात्मा ह्यवधिरर्थतः सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः ॥१३॥ यथा तरोर्मूलनिषेचनेन तृप्यंति तत्
स्कंधभुजोपशाखाः ॥ प्राणोपहाराच्च यथेंद्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥१४॥ यथैव सूर्यात्प्रभवंति
वारः पुनश्च तस्मिन्प्रविशंति काले ॥ भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवाहः ॥१५॥

लद्दलं पत्रपुष्पादयोऽपि तृप्यंति नितरां मूलसेकं विना स्वस्वनिषेचनेन प्राणस्योपहारो भोजनं तेन तस्मादेवेंद्रियाणां
तृप्तिः न तु तत्तदिंद्रियेषु पृथक्पृथक् गात्रप्रलेपनेन तथाच्युताराधनमेव सर्वदेवताराधनं न पृथक्कृतं न्यथेः ॥
रुचः सर्वमूलत्वादित्यसदृष्टान्तमाह ॥ यथैव वारः जलानि वर्षाकाले सूर्यादुद्भवंति ग्रीष्मे तस्मिन्नेव प्रविशंति द्य ॥
स्थाः प्रसिद्धं नरदृष्टांतं तरमाह यथा भूतानि भूमाविति गुणप्रवाहः चेतनाचेतनात्मकः प्रपंचः ॥१५॥ ननु हरा
वेव गुणप्रवाह इत्युक्तं तत्राधारत्वेन सोपाधिकत्वं हरेः स्यादित्याशंक्याह एतदिति एतद्धि विश्वं विलसत्सन्तं वे स्या
प्रसिद्धं पदं परं सर्वोत्कृष्टं उपाधिरहितं तदुत्पन्नत्वाभावान्नतः स्वप्रभिन्नयम् ॥ तर्हि कथमन्यथा भाति तत्राह

५२

॥ नन्वस्मद्दृशौ कथं प्रपंचोत्पत्तिलयौ तत्राह ॥ यथेति अभ्रतमः प्रकाशा आगमापायिनो रजस्तमः सत्त्वस्थानीयाः हे भूपाः प्रचेतसः अमूः शक्तयः न भवंति लीयंते इति एवमयं जगत्प्रवाहः ॥ २० ॥ तेन सर्वकारणत्वेन हेतुना कालो निमि

सकृदिति सकृत्कदाचिद्विभातं स्फुरितं गंधर्वनगरवत् यथा सवितुः प्रभा न ततोभिन्ना यथा जाग्रत्यसवः इंद्रियाणि स्फुरंति तद्वत्सुप्तशक्तयो भवंतीत्यर्थः कीदृगसौ हरिः द्रव्यादीनां त्रिविधाहंकारकार्याणां तन्निमित्तस्य भेदस्य भ्रमस्य चात्ययो यस्मात्सः यद्वा अजाग्रति सुप्तौ असवः सुप्ताः शक्तयो येषां ते भवंति द्रव्यादेरप्यत्ययो भवति सवितुः प्रभेत्युक्ततो दृष्टांतः ॥ १९ ॥
क्रियाज्ञानस्य
टीका १॥

एतत्पदं तज्जगदात्मनः ॥ परं सकृ
द्विभातं सवि ॥
तुर्यथा प्रभा ॥ यथासवो
जाग्रति स्वप्नप्राक्रियोद्व्यक्रियात्वानभिदाभ्र
मात्ययः ॥ १९ ॥ यथा नभस्यभ्रतमः प्रकाशा भवंति
भूपा न भवंत्यनुक्रमात् ॥ एवं परे ब्रह्मणि शक्तयस्त्वमू
रजस्तमः सत्त्वमिति प्रवाहः ॥ २० ॥ तेनैकमात्मानमशे
षदेहिनां कालं प्रधानं पुरुषं परेशं ॥ स्वतेजसा ध्वस्त
गुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥ २१ ॥ दयया
सर्वभूतेषु संतुष्ट्या येन केन वा ॥ सर्वे
न्द्रियोपशां
त्या च तुष्यत्याशु जनार्दनः ॥ २२ ॥ रामायनमः ॥

त्तं उपादानं पुरुषः कर्ता ॥ [illegible] ॥ एतत्त्रितयात्मकत्वात्सर्वकारणं परमेश्वरं स्वद्धामा साक्षात् भजध्वं क
संस्त्वात्मना एकभावेन अभिन्नत्वेन ॥ २१ ॥ साधनमाह दययेति ॥ प्रीतेः ॥ २२ ॥ ॥ १५ १

प्रधानं १

श्री भाग॰ टी॰ ५५

ततो न कदाचिदपि जहातीत्याह ॥ अपहृतानि निरस्तानि सकलान्येषणानि कामा यस्मात्तस्मिन् अतएवामले आत्मनि तस्मिन्नविरतं सततं
मनसि निरन्तरमेधितया भावनया उपहूतः ॥ सत्तां कोऽसौ हरिः छिद्रवत्तनुस्थाकाशवत्ततो न सरति न स्वरूपापयाति हि किं कुर्वन्
॥ आत्मनो निजजनवशगत्वं स्वभक्ताधीनत्वमयन् अवगच्छन् ॥ २० ॥ सतामेवं वश्यो योऽसौ सतां तु पूजामपि नगृह्णात्या
हेति कुमनीषिणां कुत्सितमतीनां अधनाः आत्मधना अतएव भगवद्धना ये तत्प्रियाः रसज्ञः ॥ भक्तिसुखवेत्ता के

अपहृतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः ॥ निजजनवशगत्वमात्मनोऽयन्नसरति छि
द्रवदक्षरः सतां हि ॥ २० ॥ न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ॥ श्रुतधनकुलकर्मणां
मदैर्ये विदधति पापमकिंचनेषु सत्सु ॥ २१ ॥ श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन्विबुधांश्च यः स्वपूर्णः
न भजति निजभृत्यवर्गतंत्रः कथममुमुद्विसृजेत्पुमा
न्कृतज्ञः ॥ २२ ॥ श्रीमैत्रेयः ॥ इति प्रचेतसो राजन्नन्यां
५० श्च भगवत्कथाः ॥ श्रावयित्वा ब्रह्मलोकं ययौ स्वायं
भुवो मुनिः ॥ २३ ॥ ॥ ॥

माना २

कुमनीषिणः ताना ह ॥ श्रुतादिनिमित्तैर्मदैर्ये सत्सु पापं तिरस्कारं कुर्वन्ति ॥ २१ ॥ भक्ताधीनत्वं प्रपंचयन्नाह ॥ अ
नुवर्तमानामपि श्रियं तदर्थिनः सकामान् द्विपदपतीन्नरेन्द्रान् ॥ विबुधान्देवांश्च न पियो नानुवर्तते यतः स्वेनैव पूर्णः
अतः स्वभृत्यवर्गानुरक्तमेवमेवंभूतममुमीश्वरं दीपकथं परित्यजेत् ॥ २२ ॥ प्रचेतसः कर्मभूतान् अन्यांश्च
नसन्नीति विद्यादिषु वचविताया ॥ सत्रेवायन ॥ प्रचेतसामितिमुक्ते ब्रह्मणाऽनात् ॥ २३ ॥ ॥ ॥

५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२४ प्रचेतसांनारदस्यसंवादरूपमेतदाख्यानंतेभिहितं हरेःकीर्तनंयस्मिन्तत् २५ यएषवंशःसोनुवर्णितः २६ यः
प्रियव्रतः २७ ॥ स्वानांज्ञातीनांदिदृक्षुः ॥ ३० ॥ यात्तांचरितमितिशेषः ॥ ३१ ॥ इतिश्रीभावार्थदीपिकायांच

तेपितन्मुखनिर्यातंयशोलोकमलापहं ॥ हरेर्निशम्यतत्पादंध्यायंतस्तद्गतिंययुः ॥२४॥ एतत्तेभिहितंक्षत्तर्यन्मां
त्वंपरिपृष्टवान् ॥ प्रचेतसांनारदस्यसंवादंहरिकीर्तनं ॥२५॥ शुकः ॥ यएषउत्तानपदोमानवस्यानुवर्णितः
वंशःप्रियव्रतस्यापिनिबोधनृपसत्तम ॥२६॥ योनारदादात्मविद्यामधिगम्यपुनर्महीं ॥ भुक्त्वाविभज्यपुत्रे
भ्यऐश्वर्यंसमगात्पदं ॥२७॥ इमांतुकौषारविणोपवर्णितांक्षत्तानिशम्याजितवादसत्कथां
प्रवृद्धभावोश्रुकलाकुलोमुनेर्दधारमूर्ध्नाचरणंहृदाहरेः ॥२८॥ विदुरः सोयमद्य
महायोगिन्भवताकरुणात्मना ॥ दर्शितःतमसःपारोयत्राकिंचनगोहरिः ॥२९॥
इत्यानम्यतमामंत्र्यविदुरोगजसाह्वये ॥ स्वानांदिदृक्षुः प्रययौ
ज्ञातीनांनिर्वृताशयः ॥ ३० ॥ एतद्यःशृणुयाद्राजन्राज्ञां
हर्यर्पितात्मनां आयुर्धनंयशःस्वस्तिगतिमैश्व
र्यमाप्नुयात् ॥ ३१ ॥
इतिश्रीभागवतेचतुर्थप्रचेतसोपाख्यानंनामै
कत्रिंशः ॥

चतुर्थस्कंधेएकत्रिंशोध्यायाश्चतुर्थस्कंधः समाप्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative